July - December 2023 Volume - X Issue II

Research Journal

ISSN No. 2277-7067

Journal of Fundamental & Comparative Research

शोधसंहिता

A Peer reviewed Bi-annual Interdisciplinary Research Journal of the University

UGC CARE Listed Journal

- Chief Editor -

Prof. Hareram Tripathi

Hon'ble Vice Chancellor

- Editors -

Prof. Madhusudan Penna

Director, Research and Publication

Dr. Renuka Bokare

Public Relations Officer

राष्ट्रहिताय संस्कृतम्

KAVIKULAGURU KALIDAS SANSKRIT UNIVERSITY, RAMTEK

NAAC A+

A Bi-annual Interdisciplinary Research Journal of KKSU

Peer Reviewed Journal of Fundamental & Comparative Research

शोधसंहिता

ISSN No. 2277-7067

Volume X Issue II (July - December 2023)

UGC CARE Listed Journal

Chief Editor : **Prof. Hareram Tripathi**
Hon'ble Vice Chancellor, KKSU

Editors : **Prof. Madhusudan Penna**
Director, Research and Publication, KKSU

Dr. Renuka Bokare
Public Relations Officer, KKSU

Editorial Board :

Prof. Kavita Holey
Prof. K. K. Pandey
Prof. Lalita Chandratre
Prof. Harekrushna Agasti
Dr. Deepak Kapade

Peer Review Committee :

Prof. Ramraj Upadhyay, Delhi
Prof. K. E. Devanathan, Tirupati
Prof. Nanda Puri, Nagpur
Prof. Ravindra Muley, Pune
Prof. Santoshkumar Shukla, Delhi
Dr. Madhavi Narsaley, Mumbai
Dr. Dinakar Marathe, Ratnagiri
Dr. Dinesh Rasal, Pune
Dr. Hrishikesh Dalai, Nagpur
Prof. K. Neelkanthan, Hyderabad
Prof. Krishna Kumar Pandey, Nagpur
Dr. K. Varalakshmi, Hyderabad
Dr. Madhav Ashtikar, Nagpur
Dr. Pankaj Kumar Rawal, Somnath
Dr. Shakuntala Gawde, Mumbai
Dr. Subramaniam Vereventi, Pune
Prof. Shivram Bhat, Tirupati
Prof. Shukdev Bhoi, Delhi

Published by : **Registrar,** KKSU, Ramtek

© KKSU, Ramtek

राष्ट्रहिताय संस्कृतम्

KAVIKULAGURU KALIDAS SANSKRIT UNIVERSITY
RAMTEK

प्रधानसंपादकीयम्

सर्व एव शास्त्रज्ञा: स्वस्वसिद्धान्तव्यवस्थापनावसरे सन्दिग्धविषयनिर्णयाय प्रमाणं तर्कञ्च प्रदर्शयान्ति । प्रमाणेषु मूर्धन्यं प्रमाणं वेद इत्यत्र न कस्यापि आस्तिकशास्त्रज्ञस्यास्ति वैमत्यम् । यदि वेदेऽपि संदेह आपतेत् । तत्र कथं विषयनिर्णय इति जातायां जिज्ञासायां तदर्थं विचार: प्रवर्तित: शास्त्रज्ञै: । वादे वादे जायते तत्त्वबोध: इत्यभियुक्ता आचक्षते । वेद एवमनुशास्ति इति प्रदर्शनमात्रेण तत्रैव स्वीकृत्य गमने सति 'श्रद्धाजाड्या इमे' इत्यपालम्भविषया भवेयुरिति शास्त्रज्ञास्तत्र विचारं प्रवर्तयन्ति ।

प्रतिपक्षिणा समुपस्थापितं प्रमाणं युक्तिभिस्तर्कैश्च परिशील्य स्वसिद्धान्तप्रतिपादनं सुग्राह्यं भवति। वैदिकवाङ्मयमारभ्य दर्शनसांख्यमालंकारिकजैनव्याकरणगमननाट्यशास्त्रनगररचनादण्डनीतियोगवेदांङ्ग-काव्यशिक्षाशास्त्रादिविषयान् स्वीकृत्य संस्कृत-हिन्द्याङ्ग्लभाषायामत्र त्रिंशत् शोधपत्राणि संदर्भसूचीसहितानि सन्ति । तत्र भारतीयज्ञानपरम्पराया: क्रमिको विकासो भवितुमर्हतीति मन्ये ।

शोधपत्रलेखकान् प्रति यथोचितमभिवादनं विधाय तथा च संपादकमण्डलमभिनन्द्य भगवन्तं हनुमन्तं प्रणम्य विरमामि ।

हरेराम त्रिपाठी
कुलगुरुः
कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः,
रामटेकम्

Content

Sr. No.	Title	Page No.
	Invited Papers :	
1.	**शिक्षाशास्त्रे तन्त्रयुक्तीनाम् उपयोगिता** देवदत्त: सरोदे	1
2.	**सिद्धपदस्थलिङ्गेभ्यः अन्वाख्यानरीतिः** चैतन्यः सु लक्कुण्डी, प्रो. शिवानी वि	26
3.	**श्रीमद् भगवद्-गीता की पाठालोचना** वसन्तकुमार म.भट्ट	33
4.	**The role of 'anaucitya' in the comprehension of a proverb** Dhanashree Lele, Malhar Kulkarni	53
5.	**Translation to Creativity Reading in Aurobindo's -Translation of Sanskrit works** Nandkishor Pattarkine	65
	Research Papers:	
6.	**वैदिक वाङ्मयस्य आलोके सरस्वतीस्वरूपम्** नरेन्द्रकुमारपाण्डेयः	85
7.	**वैदिकवाङ्मयेषु कात्यायनश्रौतसूत्रस्योपादेयता** डॉ. अश्विनी शुक्ला	92
8.	**भारतीयदर्शनेषु प्रामाण्यवादविमर्शः** डॉ. विनयगोपाल-त्रिपाठी	109
9.	**आचार्यविज्ञानभिक्षोः अधिष्ठानकारणवादस्य पर्यालोचनम्** पूर्णचन्द्र-मण्डलः	116
10.	**आलंकारिकभामहकृतस्य बौद्धदर्शनसम्मत-प्रत्यक्षप्रमाणखण्डनस्य तात्पर्यविश्लेषणम्** ड. अञ्जन-दासः	124

11. **जैनप्रमाणमीमांसायां प्रत्यक्षप्रमाणविमर्शः** 133
शशांकशेखरपात्रः

12. **वाक्यपदीयदिशा जयकृष्णकृतसारमञ्जर्य्याः कर्तृत्वविमृष्टिः** 141
प्रियाङ्का साहा

13. **वाक्यपदीये अपभ्रंशविमर्शः** 150
डॉ. अभिजित् घोषः

14. **भाषावृत्त्यर्थविवृतिदिशा गुण-वृद्धिसंज्ञासूत्रविचारः** 160
शङ्खशुभ्र-गच्छितः

15. **संज्ञासूत्रेषु तपरकरणस्य प्रयोजनप्रतिपादनम्** 170
डॉ. पी. आर. अर्चना कारंथ

16. **हरिभास्कर-अग्निहोत्रिकृत-परिभाषाभास्करदिशा यदागमपरिभाषाविमर्शः** 178
प्रीतम बेरा

17. **अलंकारशास्त्रदृष्ट्या रससंख्याविवेचनम्- एका समीक्षा** 190
कांचन बारीक

18. **वैष्णवनाट्यशास्त्रानुसारं नाटकनायकस्वरूप-विमर्शनम्** 200
सनातन दास

19. **संस्कृतवाङ्मये नगररचना** 209
प्रज्ञा करकरे, प्रो. पराग जोशी

20. **फलतावच्छेदकसम्बन्धविचारः** 221
नीरज-कुमार-भार्गवः

21. **दत्तकस्य वयो विचारः** **230**

विकाश सरकारः

22. **वेदों में वैज्ञानिक तत्त्व** **237**

डॉ० स्वामी परमार्थदेव

23. **वेदांग निरूक्त में शिक्षा चिंतन** **250**

जयश्री दवे

24. **योग ग्रन्थों में वर्णित 'बस्ति क्रिया' का चिकित्सीय स्वरूप** **258**

देवेश कुमार, ऊधम सिंह

25. **महाकवि मेधाव्रत के काव्यों में वर्षा ऋतु** **265**

ममता

26. **जैन शैली में चित्रित शत्रुंजय तीर्थपटों का कलात्मक अध्ययन** **276**

पूनम रानी

27. **Design of 'Management-Level Control Questionnaire' based on insights from Vālmīki Rāmāyaṇa** **288**

Viswanathan Panchukrishnan, Mahadevan B, Srinidhi K Parthasarathi

28. **Puskarana, Chandravarman and an Inscription at Susunia Hill** **296**

Ramyajit Sarkar

Book Review:

29. **A review of Vishnvarchana – a commentary on Purusha sukta** **305**

Dr.Shrinidhi S Pyati

30. **Contributors List** **311**

Invited Papers

शिक्षाशास्त्रे तन्त्रयुक्तीनाम् उपयोगिता

देवदत्तः सरोदे

सारांशः - शास्त्ररचनायै, शास्त्रावबोधाय च केचनोपायाः शास्त्रेषु प्रयुक्ताः परिगणिताश्च, ते चोपायाः तन्त्रसाधनीभूताः सन्तः तन्त्रकार्याणि साधयन्ति। इमे उपायाः तन्त्रयुक्तिनाम्नाभिधीयन्ते। तन्त्रं नाम शास्त्रम्। युक्तिर्नाम उपायः, अथवा युक्तिर्नाम युज्यन्ते सङ्कल्प्यन्ते सम्बध्यन्ते परस्परमर्थाः प्राकरणिकेऽभिमतेऽर्थे विरोधव्याघातादिदोषजातमपास्यानयेति युक्तिः[१]। तन्त्रस्य युक्तिः तन्त्रयुक्तिः । शास्त्ररचनाव्याख्याननिमित्तं साधनीभूताः उपायाः तन्त्रयुक्तयः। अत्रासां तन्त्रयुक्तीनां किं प्रयोजनम्? उच्यते- वाक्ययोजनमर्थयोजनं च। शिक्षाशास्त्रं नाम शिक्षणाधिगमशास्त्रम्। छात्रस्य सर्वाङ्गीणविकासाय शिक्षाशास्त्रं मूलाधारत्वेन तिष्ठति। तत्र शिक्षाशास्त्रे अध्यापकस्य अध्यापनकर्मणि, छात्रस्य च पाठावबोधने एताः तन्त्रयुक्तयः नितरामुपकुर्वन्ति।

कूटशब्दाः - तन्त्रयुक्तिः, शिक्षाशास्त्रम्, अधिकरणम्, उद्देशः, योगः, व्याख्यानम्, पूर्वपक्षः, निर्णयः, ऊह्यम् , उपयोगिता शिक्षणम्, अधिगमः,

ज्ञानं मनुजस्य तृतीयं नेत्रम्[२] इति शास्त्रे उक्तम्। शास्त्रं मनुष्याणां ज्ञानचक्षुः भवति । पुराकालाद् आरभ्य ज्ञानं विज्ञानं च उत्तरवर्तिसन्तत्यै उपदेष्टुं प्रदातुं च शास्त्राणि प्रणिन्युः आचार्याः। सत्यं, ज्ञानं, तत्त्वम् एतेषां सम्यगभिज्ञानाय श्रुत्यादिशास्त्राणि प्रमाणानि उपकारकसाधनानि च सन्ति। प्रमाणभूतं शास्त्रम् अस्मत्प्रामाणिकज्ञानाय जीवातुभूतं वरीवर्त्ति। संस्कृतभाषायाम् अनेकानि शास्त्राणि सन्ति। शास्त्रबोधः सुकरतया भवेद् एतदर्थं कतिपये उपायाः निर्दिष्टाः । शास्त्राणां रचनापद्धतिः स्वरूपं च कथं स्यात्? इति मनसि निधाय शास्त्ररचनायै काचित् व्यवस्था, केचन नियमाः, उपायाः, परिकल्पिता आचार्यैः। ते उपायाः तन्त्रयुक्तिनाम्ना अभिधीयन्ते। अत्रासां तन्त्रयुक्तीनां किं प्रयोजनम्? उच्यते- वाक्ययोजनमर्थयोजनं च । शास्त्ररचनायै अपि इमाः तन्त्रयुक्तयः उपयुज्यन्ते। शास्त्रस्य यथायथं स्वरूपं वेत्तुं तन्त्रयुक्तयः महदुपकुर्वन्ति अतःशास्त्रेषु तन्त्रयुक्तयः स्वतन्त्रस्थानम् आवहन्ति ।

शास्त्राणां क्रमबद्धं सुव्यवस्थितं परिपूर्णविषयप्रतिपादनपरं ज्ञानं तन्त्रयुक्तिभिः भवति। शास्त्रावगमाय व्याख्यानाय च एतासां तन्त्रयुक्तीनाम् अनितरसाधारणमहत्त्वं विद्यते। यतः आभिः तन्त्रयुक्तिभिः शास्त्रतत्त्वं प्रकाश्यते, अतः सम्यक् शास्त्रज्ञानाय तन्त्रयुक्तीनाम् अध्ययनम् अपेक्षितम् अस्ति ।

शिक्षायाः प्रमुखोद्देश्यं भवति बालकस्य सर्वाङ्गीणविकासः। शिक्षाशास्त्रं नाम शिक्षणाधिगमशास्त्रम्, सर्वशास्त्रबोधकं शिक्षाशास्त्रम् । शिक्षाशास्त्रस्य घटकेषु यथा शिक्षणविधिषु, शिक्षणसूत्रेषु, शिक्षणोपायेषु शिक्षणाधिगमविषयेषु तन्त्रयुक्तीनां प्रयोगज्ञानं यदि सम्यक् भवति चेत् तत् तन्त्रयुक्तिप्रयोगज्ञानं छात्राणाम् अनुसन्धातृणाम् अध्यापकानां च महते उपकाराय कल्पते । शास्त्रशिक्षणाय, शास्त्राधिगमाय, शास्त्ररचनायै च तन्त्रयुक्तीनाम् उपयोगिता महती विद्यते अतः सम्यक् शास्त्रज्ञानाय शास्त्रशिक्षणकौशलप्राप्तये च तन्त्रयुक्तीनाम् अध्ययनम् अपेक्षितम् अस्ति इति मनसि कृत्वा नानाशास्त्रेषु वर्णितानां परिगणितानां तन्त्रयुक्तीनाम् अनुशीलनं विधाय लक्षणानि परिशील्य शिक्षाशास्त्रस्य नानाविषयेषु तन्त्रयुक्तयः कथम् उपकुर्वन्तीति अस्मिन् लेखे विचार्यते।

तन्त्रयुक्तेः अर्थः

तन्त्रम् – तन्त्रमिति पदं तनुविस्तारे इत्यस्माद्धातोः औणादिके ष्ट्रन् प्रत्यये कृते सति निष्पद्यते।

तनोति विपुलानर्थान् तत्त्वमन्त्रसमन्वितान्।
त्रयं च कुरुते यस्मात् तन्त्रमित्यभिधीयते।।[३]

युक्तिः - अथ का नु खलु युक्तिः? युक्तिर्नाम "युज्यन्ते सङ्कल्प्यन्ते सम्बध्यन्ते परस्परमर्थाः प्राकरणिके अभिमतेऽर्थे विरोधव्याघातादिदोषजातमपास्यानयेति युक्तिः"। युक्तिर्नाम उपायः, हेतुः, कारणम्, क्रमबद्धता, रचना, न्यासः, समुचितादयः बहवः अर्थाः सन्ति। चरकस्तु युक्तिलक्षणमेवमाह

बुद्धिः पश्यति या भावान् बहून् कारणयोगजान्।
युक्तिस्त्रिकाला सा ज्ञेया त्रिवर्गः साध्यते यया॥[४]

यया धर्मः अर्थः कामः इति त्रिवर्गः साध्यते अथवा विज्ञातेऽर्थे कारणोपपत्तिदर्शनात् अविज्ञातेऽपि तदवधारणं युक्तिः। ज्ञातार्थे कारणसङ्गतिं वीक्ष्य

अविदितार्थे तत्साधनविनिश्चय: युक्ति: ।

निम्नलिखितश्लोक: तन्त्रयुक्ते: ज्ञानस्य महत्त्वं सूचयति

तद्यथा – "अधीयानोऽपि तन्त्राणि तन्त्रयुक्त्यविचक्षण:।
नाधिगच्छति तन्त्रार्थमर्थं भाग्यक्षये यथा।।"[५]

शास्त्राण्यधीयान: कश्चन जन: तन्त्रयुक्ती: न जानाति चेत्स तन्त्रार्थं ज्ञातुं न प्रभवति। यथा भाग्यक्षये सति जन: अर्थं प्राप्तुमसमर्थो भवति।

चरकाचार्य: स्वीयं तन्त्रं कथं विशिष्टं दोषरहितं विद्यते तदर्थं हेतुराह तथा च

इदमन्यूनशब्दार्थं तन्त्रं दोषविवर्जितम्।
षड्विंशता विचित्राभिर्भूषितं तन्त्रयुक्तिभि:।।[६]

चरकसंहितायाम् इमा: षड्विंशत् युक्तय: परिगणिता: ।

तत्राधिकरणं योगो हेत्वर्थोऽर्थः पदस्य च ॥
प्रदेशोद्देशनिर्देशवाक्यशेषाः प्रयोजनम् ।
उपदेशापदेशातिदेशार्थापत्तिनिर्णयाः ॥
प्रसङ्गैकान्तनैकान्ताः सापवर्गो विपर्ययः।
पूर्वपक्षविधानानुमतव्याख्यानसंशयाः ॥
अतीतानागतावेक्षास्वसंज्ञोह्यसमुच्चयाः ।
निदर्शनं निर्वचनं संनियोगो विकल्पनम् ॥
प्रत्युत्सारस्तथोद्धारः संभवस्तन्त्रयुक्तयः ।[७]

(१)अधिकरणम् (२)योग: (३)हेत्वर्थ: (४)पदार्थ: (५)प्रदेश: (६)उद्देश: (७)निर्देश: (८)वाक्यशेष: (९)प्रयोजनम् (१०)उपदेश: (११)अपदेश: (१२)अतिदेश: (१३)अर्थापत्ति: (१४)निर्णय: (१५)प्रसङ्ग:(१६)एकान्त: (१७)नैकान्त: (१८)अपवर्ग: (१९)विपर्यय: (२०)पूर्वपक्ष: (२१)विधानम् (२२)अनुमतम् (२३)व्याख्यानम् (२४)संशय: (२५)अतीतावेक्षणम् (२६)अनागतवेक्षणम् (२७)स्वसंज्ञा (२८)ऊह्य: (२९)समुच्चय: (३०)निदर्शनम् (३१)निर्वचनम् (३२)नियोग: (३३)विकल्पनम् (३४)प्रत्युत्सार: (३५)उद्धार: (३६)सम्भव: ।

शिक्षाशास्त्रस्य नानाघटकेषु तन्त्रयुक्तीनाम् उपयोगिता

i. अधिकरणम् - Topic of Discussion

i. लक्षणम् - 'अधिकरणं नाम यमर्थमधिकृत्य प्रवर्तते कर्त्ता' । विघ्नभूता यदा रोगा इत्यादि[८] ।

ii. विवरणम् – यदा ऋषीणां तपश्चरणे रोगा: बाधका : सञ्जाता:, तदा ऋषय: तान् रोगान् निवारयितुं तद्अधिकृत्य आयुर्वेदशास्त्रं प्रणिन्यु: । इह खलु आयुर्वेदशास्त्रे ऋषय: रोगान् अधिकृत्य प्रावर्तन्त शास्त्रञ्च रचयामासु:, अत: अत्र रोगा: अधिकरणम्। अथवा शास्त्रस्य प्रमुखविषय:, प्रतिपाद्यविषयो वा अधिकरणम् ।

iii. विनियोग: - पाठ्यपुस्तकरचनायाम् इदमधिकरणम् उपकर्तुं प्रभवति। यथा – पतञ्जलिना प्रणीतं योगशास्त्रं योगमधिकृत्य प्रवर्तते तथा च अथ योगानुशासनम्[९] इति प्रथमसूत्रे शास्त्रं किमधिकृत्य प्रवृत्तम् इति निर्दिष्टम् अत: इह योग: अधिकरणम् । एवमेव अथ शब्दानुशासनम्[१०] इत्यत्रापि व्याकरणशास्त्रम् अधिकरणम् अस्ति। एवमन्यात्रापि बोद्धव्यम् । पाठ्यपुस्तकरचनाप्रसङ्गे, शास्त्ररचनाकाले एतदवधेयं यत् पाठ्यपुस्तकस्य शास्त्रस्य वा प्रधानविषय: सदा केन्द्रीभूत: स्यात् । अधिकरणं नाम यदधिकृत्य प्रवर्त्तते शास्त्रं स्थानम् अध्यायः प्रकरणं वाक्यं (सूत्रम्) वा । आयुर्वेदशास्त्रे अधिकरणमेवं प्रयुक्तम् - चरकसंहिता शास्त्रमिति शास्त्राधिकरणं तस्मिन् शास्त्रे स्थानानि सन्ति तत्स्थानाधिकरणम्, तेषु स्थानेषु अध्याया: सन्ति तत् अध्यायाधिकरणम्, अध्यायेषु प्रकरणानि सन्ति तत् प्रकरणाधिकरणम्, प्रकरणेषु सूत्राणि (वाक्यानि वा) सन्ति तत् सूत्राधिकरणम् एवं रीत्या शास्त्ररचना व्यवस्थितक्रमेण भवति। एतेन एकस्य शास्त्रस्य सकलं ज्ञानं व्यवस्थितरीत्या क्रमेण एकत्र निहितं भवति, एतस्य अध्ययनेन तत्रत्यकृत्स्नविषयान् विज्ञाय अध्येता तच्छास्त्रकोविदो भवितुमर्हति।

अधिकरणस्य अपरमपि लक्षणं विद्यते ।

i. लक्षणम् - विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् ।
सङ्गतिश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं विदुः ॥[११]

ii. विवरणम् - विषयः, विशयः, पूर्वपक्षः, उत्तरपक्षः, सङ्गतिः इति एभिः पञ्चभिः सोपानैः विषयनिरूपणं क्रियते। शास्त्रे विषयोपस्थापनं व्यवस्थितक्रमेण क्रियते, तदर्थमाश्रितः क्रमः एव अधिकरणनाम्ना प्रोच्यते। आदौ विषयः कश्चन प्रस्तोतव्यः। अधिकरणस्य प्रथमः अवयवः भवति विषयः । विषयो विचारार्हं वाक्यम्। अथवा शास्त्रस्य प्रतिपाद्यं मुख्यं तत्त्वम् । कस्मिंश्चित् विषये निर्णयात् प्राक् प्रथमतः विषयस्य उपस्थापनं क्रियते । तस्य विषयस्य प्रस्तावे का पूर्वसङ्गतिः इति प्रतिपादयेत् । विशयः नाम संशयः । विशयो नामाऽस्यायमर्थो न वा। अयम् अधिकरणस्य द्वितीयः अवयवः भवति । एकस्मिन् एव विषये द्वैपाक्षिकविचारः भवति इदं वा तद्वा । अथवा उभयकोटिस्पृग्ज्ञानं संशयः । पाठनप्रसङ्गे विषयोपस्थानात् परं तस्मिन् विषये विद्यमानः संशयः कः इति संदेहः उद्भावनीयः। समुत्पन्ने सन्देहे पूर्वपक्षः कश्चन प्रतिपाद्येत सिद्धान्तभिन्नं वादिभिन्नम् अपरस्य मतसमर्थनम् एव पूर्वपक्षः । प्रकृतविषयस्य यावन्तः सम्भाविताः पूर्वपक्षाः भवन्ति तावन्तः छात्रमुखेन उद्भावनीयाः ततः परं समेषां पूर्वपक्षाणां निरासपूर्वकं समाधानरूपं सिद्धान्तम् उपस्थापयेत्। एतेन सिद्धान्तः दृढप्रतिष्ठः भवति। पूर्वपक्षस्य युक्तेः वर्जनम् कृत्वा स्वस्य पक्षस्य युक्तेः सिद्धिः एव उत्तरपक्षस्य सिद्धान्तः । सिद्धान्तपक्षः एव उत्तरपक्ष इति कथ्यते। ततः परं शास्त्रवचनस्य सङ्गतिः निर्दुष्टैकवाक्यता सम्पादनीया । एवं शास्त्रस्य प्रतिपाद्यविषयस्य सर्वाणि अङ्गानि, सर्वपक्षान् विमृश्य क्रमिकतया अशेषपूर्वपक्षान् उद्भाव्य सयुक्तिकं सोदाहरणं पूर्वपक्षान् निरास्य उत्तरपक्षं सिद्धान्तपक्षं समाधानपुरस्सरं शास्त्रसङ्गतिञ्च सम्पाद्य विषयनिरूपणं कुर्यात्

ii. विनियोग: - अध्यापक: छात्राणां पुरत: विषयं प्रस्तौति। छात्रा: विषयं श्रुत्वा प्रस्तुतविषये विविधान संदेहान् प्रकटीकुर्वन्ति। संदेहान् अवलम्ब्य छात्रा: पूर्वपक्षान् उपस्थापयन्ति। तदा अध्यापक: प्रीत्या सप्रमाणं सर्वपूर्वपक्षान् खण्डयित्वा स्वपक्षमण्डनं करोति स्वसिद्धान्तं च स्थापयति। पाठ्यविषयवचनस्य सङ्गतिं सम्पादयति। एवंरीत्या अध्यापनेन छात्राणां विषयबोध: सुष्ठु सम्पद्यते ।

शिक्षाशास्त्रदृशा अधिकरणस्य द्वौ पक्षौ भवत:, यथा- १. रचनापक्ष:, २. व्याख्यानपक्ष: च।

१.रचनापक्षः – शैक्षिकव्यवस्थायां कस्यापि शास्त्रस्य विषयस्य वा क्रमिकं व्यवस्थितं ज्ञानम् अपेक्षितम् इति हेतो: पाठयक्रमः अनिवार्यः भाग: भवति । पाठयक्रमे शिक्षणस्य ज्ञानात्मकः, भावात्मकः अपि च मनोगत्यात्मकः इति त्रयः पक्षा: सम्मिलिता: भवन्ति । विद्वद्भि:अध्यापकै: निश्चितः तर्कपूर्ण: पाठयक्रमः निर्मितः भवति । एष: पाठयक्रमः पाठ्यक्रमरचनासिद्धान्तान् आधारीकृत्य भवति। बालानां सुखबोधाय पाठयक्रमे क्रमबद्धं विषयवस्तु पाठरचना च भवेत् तदर्थम् अत्र अधिकरणतन्त्रयुक्ति: महदुपकरोति।

कक्षायां छात्रान् पाठयितुम् अध्यापक: कमपि विषयमवलम्ब्य पाठनस्य पूर्वसन्नाहं करोति प्रभाविशिक्षणाय पाठयोजनां निर्माति। अत्र मुख्यत्वेन अनेन अध्यापनेन कानि उद्देश्यानि साधनीयानि इति मनसि कृत्य उद्देश्यलेखनं करोति। कथञ्च सम्पादनीयानि इति विनिश्चित्य शिक्षणव्यूहं रचयति सर्वमेतत् विस्तरेण पाठयोजनायां लिखति, अत्र बहूनि सोपानानि भवन्ति। भिन्नभिन्नसोपानेषु भिन्नभिन्नतन्त्रयुक्तिं प्रयुङ्क्ते। एवं रचनापक्षे तन्त्रयुक्तीनां प्रयोग: उपयोगिता च भवति।

२. व्याख्यानपक्ष: - अध्यापनवेलायां पाठयोजनां समाश्रित्य अधिकरणस्य उपयोगः भवति । अधिकरणस्य पञ्चसोपानै: छात्रा: बोधनीया: । अधिकरणस्य पञ्चयुक्तिवाक्यानि कठिनविषयं सरलीकर्तुं स्पष्टीकर्तुं च प्रभवन्ति । एषु पञ्चसोपानेषु व्याख्याया: मूलभावानानां विचाराणां च समुचितं सन्तुलितं च सारतत्त्वं भवेत् । अध्यापकः विभिन्नोपायै: छात्राणाम् अवधानमाकृष्य व्याख्यानं विदध्यात् ।

अध्यापकः पाठनसमये विषयः, संशयः, पूर्वपक्षः, उत्तरपक्षः, निर्णयः एभि: पञ्चभि: सोपानै: अधिकरणस्य विषयस्य स्पष्टीकरणं कुर्यात्। व्याख्यानं सोद्देश्यं, सरलं, शुद्धं, स्पष्टं बोध्यगम्यञ्च भवेत्।

2) योग: - Correlation, Joining, Connecting, Concomitance

i. लक्षणम् - योगो नाम अन्वयः । योगो नाम योजना व्यस्तानां पदानामेकीकरणम्[१२]।

ii. विवरणम् - योगो नाम अन्वय:। भावावगाहनाय कर्तृकर्मक्रियादीनां कश्चन क्रमः आवश्यकः, ईदृशक्रमज्ञानाय अन्वयः आवश्यकः। अर्थानुसारिपदनिधानं नाम अन्वय: । अन्वयमाध्यमेन शास्त्रस्य, पद्यस्य अर्थबोधः शीघ्रं भवति । अन्वयस्य उपयोगस्तु पद्यपाठने भवति । गद्यम् अन्वयं विना पाठयितुं शक्यते पद्यन्तु न तथा । गद्ये कर्त्ता, कर्म, क्रिया च क्रमशः भवन्ति, पद्ये न तथा। अन्वयसम्पादनाय अयं क्रम: समाश्रयणीय:।

कर्तृकर्मक्रियास्तावत् श्लोके योज्यास्ततःपरम् ।
किमो रूपं पुरस्कृत्य तृतीयादि नियोजयेत् ।।
ल्यबन्तञ्च तुमन्तञ्च त्त्वान्तं कर्मविभूषितम् ।
खण्डान्वये पुनः प्रश्नपूर्वमन्ते प्रयोजयेत् ।।[१३]

अन्वयसम्पादनाय श्लोके विद्यमानं प्रधानं वाक्यमन्वेषणीयम् । प्रधानवाक्यस्यान्वेषणानन्तरं क्रियापदं मृग्यम्। तत्क्रियापदम् आदाय अन्यानि पदानि सार्थकक्रमे योजयितुं शक्नुम: । अत: पद्ये अन्वयं कर्तुम् आदौ केन्द्रीभूतं क्रियापदं द्रष्टव्यं तत: आकाङ्क्षया कर्तृकर्मकरणादिकारकाणि तद्विशेषणानि अन्यानि पदानि क्रियया सह योजनीयानि। कर्तृकर्मकरणादिपदानां ज्ञानाय कः किम्, केन, कस्मै, कस्मात्, कस्य इति सर्वनामशब्दानां रूपाणि पुरस्कृत्य प्रश्नाः पृष्टव्या: । विशेषणानां ज्ञानाय कीदृशम्, किं भूतम्, कथं भूतम्, इत्यादयः प्रश्नाः प्रष्टव्याः । क्रियाणां ज्ञानाय किं करोति, किं कृत्वा इत्यादयः प्रश्नाः प्रष्टव्याः । क्रिया विशेषणानां ज्ञानाय कुतः, कुत्र, कदा, कथं, किमर्थम् इति पदान्यादाय प्रश्नाः प्रष्टव्याः । एवं किमो रूपाणि समाश्रित्य आकाङ्क्षामुखेन प्रश्नान् पृष्ट्वा अन्वयं सम्पादयेत् ।

अत्र प्रश्नानां कश्चन क्रमो भवति तेन विषयबोध: अन्वयसम्पादनञ्च लीलया भवति।

iii. विनियोग: - पद्यशिक्षणे अस्या: योगतन्त्रयुक्ते: विनियोग: भवति । पद्यस्य व्याख्यानं निम्नाङ्कितलक्षणेन क्रियते ।

पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना ।
आक्षोपोऽथ समाधानं व्याख्यानं षड्विधं मतम् ।। [१४]

अत्र वाक्ययोजना नाम अन्वय:। पद्ये छन्दोऽनुरोधेन व्यस्तानां पदानाम् अर्थानुसारम् एकार्थतायै एकवाक्यतासम्पादनम् अपेक्षितम्। अन्वयेन एकार्थता सम्पाद्यते । दण्डान्वयेन खण्डान्वयेन वा पद्यस्य अर्थावगाहने सौकर्यं भवति । विषय: सम्पूर्णरूपेण ज्ञातुं शक्यते । श्लोकस्य भावावगहनं सरलतया भवति । छात्राणां कृते मनोरंजकतया प्रभावोत्पादकतया च पद्यं शिक्षयितुं शक्यते ।

i. लक्षणम्- योगः नाम योजना ।

ii. विवरणम् - योगो नाम योजनम्, सम्बन्धकल्पनम् यथा - उद्देशनिर्देशयोः योजनम् ।

iii. विनियोग: - पाठयोजनासु उद्देशनिर्देशयोः योजनं भवति । पाठयोजनासु शीर्षकव्याख्यानयो: योगः भवति । पाठ्यविषयस्य शीर्षकम् उद्देश:, शीर्षकस्य व्याख्यानम् निर्देशः भवति । उदाहरणं यथा - कक्षायाम् अध्यापकः पर्यावरणप्रदूषणम् इति शीर्षकम् अधिकृत्य पाठयति तर्हि पर्यावरणप्रदूषणम् इति उद्देश: भवति । पर्यावरणप्रदूषणस्य व्याख्यानं निर्देश: भवति। यदि अध्यापक: शीर्षकमतिरिच्य अन्यस्य व्याख्यानं करोति तर्हि उद्देशनिर्देशयोः सम्बन्ध: भवितुं नार्हति । अध्यापने अध्यापक: विषयं केन्द्रीकृत्य प्रवर्तेत। प्रधानविषयं लक्ष्यीकृत्य तस्य सर्वविधव्यूहरचना तदनु क्रमिकं शिक्षणं भवेत् तदानीं तस्य शिक्षणं सफलं भवति।

i. लक्षणम् - योगो नाम योजनम्, सम्बन्धकल्पनम् । सूत्रभाष्ययोः योजनम् योगः

ii. विवरणम् - सूत्रभाष्ययोः योजनम् योगः। सूत्रभाष्ययोः सन्धानं स्यात्।

सूत्रानुसारं भाष्यं भवति तर्हि तन्नाम योगः। यथा – व्यासभाष्यं, शाङ्करभाष्यम्। महाकाव्यस्य (तत्पद्यानां) व्याख्या, टीका वा
यथा- कालिदासस्य काव्यानां व्याख्यानं मल्लिनाथ: पद्यस्य अन्वयमुखेन करोति तथा च मल्लिनाथेन एवं प्रतिज्ञायते

इहान्वयमुखेनैव सर्वं व्याख्यायते मया ।
नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते[१५]।।

मल्लिनाथ: स्वीयटीकासु यथा तेन प्रतिज्ञातं तदनुसारं पद्यस्य व्याख्यानं करोति । मनागपि पद्यस्य मूलतत्त्वं विहाय अन्यथा व्याख्यानं न करोति परमन्वयमुखेनैव व्याख्यानं करोति। व्याकरणे वृद्धिरादैच् इति सूत्रम्, अस्य वृत्ति: भाष्यमपि सूत्रानुरूपमेव विद्यते। अत: अत्र सूत्रभाष्ययो: योगो विद्यते।

iii. विनियोग: - छात्राध्यापक: कक्षायां कञ्चन विषयं तस्य शीर्षकम् अवलम्ब्य पाठयति व्याख्यानं वा करोति न तु अन्यत् शीर्षकम् आधृतं व्याख्याति तर्हि अत्र योगतन्त्रयुक्ते: प्रयोगकारणात् तस्य व्याख्यानं प्रभावि भवति शिक्षणं सफलं भवति । यदि अध्यापक: व्याकरणे गुणसन्धि: इति पाठस्य शीर्षकम् अनुसृत्यैव व्याख्यानं करोति चेत् स अध्यापक: 'योग' इति तन्त्रयुक्तिं प्रयुङ्क्ते इति मन्यामहे ।

i. लक्षणम् - योगः नाम योजना ।
ii. विवरणम् -प्रतिज्ञा, हेतु:, उदाहरणम्, उपनय:, निगमनम्। योगः इति उच्यमाने पञ्चयुक्तिवाक्यानां सन्धानम् । कस्यचित् विषयस्य प्रतिपादनार्थं पञ्चयुक्तिवाक्यानामावश्यकता वर्त्तते। पञ्चयुक्तिवाक्ययोजनम् योगःइति उच्यते ।

iii. विनियोग: - तार्किकरीत्या विषयनिरूपणं एभि: पञ्चयुक्तिवाक्यै: सम्भवति । यथा अत्र पर्वत: वह्निमान् अस्ति इति परार्थानुमानेन एभि: पञ्चयुक्तिवाक्यै:

निरूप्यते ।

- प्रतिज्ञावाक्यम्- पर्वतो वह्निमान् ।
- हेतुवाक्यम् - धूमवत्त्वात् ।
- दृष्टान्तवाक्यम् - यत्र यत्र धूमस्तत्र तत्र वह्निर्यथा महानसे।
- उपनयवाक्यम् - पर्वतोऽपि धूमसत्त्वाद् वह्निरेव ।
- निगमनवाक्यम् - धूमसत्वाद् वह्निसत्वे पर्वतो वह्निमान् इति सुनिश्चितं भवति ।

एवमन्यत्रापि अध्यापक: अध्यापनावसरे अनया तन्त्रयुक्त्या प्रभाविरीत्या विषयनिरूपणं कर्तुमर्हति ।

3) उद्देश: - Mention in brief

i. लक्षणम् - समासवाक्यम् उद्देशः[१६] । नाममात्रेण वस्तुसंकीर्तनम् उद्देश:
ii. विवरणम् - नाममात्र कथनम् उद्देश: इति कथ्यते।
iii. विनियोग: - पाठ्यविषयस्य शीर्षकम् उद्देश: भवति । अध्यापनवेलायाम् अध्यापकः प्रधानविषयस्य कृत्स्नश: अवबोधाय प्रधानशीर्षकस्य खण्डश: उपशीर्षकाणि आदाय व्याख्यानं कुर्यात्। उपशीर्षकाणि तत्र उद्देशः भवति।

4) निर्देश: - Mention in detail, Amplification

i. लक्षणम् - निर्देशो नाम संक्षेपेणोक्तस्य विस्तरेण विवरणं यथा हेतुलिंगौषधस्य पुनः प्रपञ्चनम्[१७]।
ii. विवरणम् - विस्तरविवरणम् निर्देशः। सुव्यवस्थिततार्किकविवरणं निर्देशः इति उच्यते। वस्तुत: उद्देशनिर्देशौ परस्परं पूरकौ स्त:। उद्देशस्य विस्तरविवरणं निर्देशो भवति।
iii. विनियोग: - कक्षाध्यापने व्याख्यानवेलायां निर्देशस्य उपयोगः भवति । विस्तरेण स्पष्टविवरणं इति निर्देशः। विवरणात्मके व्याख्याने कस्यचित् विषयस्य, विचारस्य, सिद्धान्तवाक्यस्य वा मुख्यार्थः स्पष्टीक्रियते । छात्राणां

सम्मुखे उत्तमव्याख्याने श्रोतृणां मानसपटले विषयस्य स्पष्टचित्रोपस्थापनं भवति । अतः स्पष्टं रचितं रोचकञ्च विस्तरविवरणं निर्देशः इति कथ्यते ।

5) प्रयोजनम् - Purpose, Aim

i. लक्षणम् - प्रयोजन नाम यदर्थं शास्त्रादि प्रवर्तते [१८]।

ii. विवरणम् - प्रयोजनमाध्यमेन कार्यस्य दिशा निर्दिष्टा भवति । किम् करणीयम्? कथं करणीयम्? इति। पाठयोजनालेखने उद्देश्यानि लेख्यानि भवन्ति। इमानि उद्देश्यान्येव प्रयोजनं सूचयन्ति। शास्त्रेष्वपि अनुबन्धचतुष्टयम्भवति तत्र प्रयोजनम् अन्यतमं विद्यते। शास्त्रमिदं किम् उद्दिश्य प्रवृत्तम् इति।

iii. विनियोग: - अध्यापकः पाठयोजनायां बहूनि सोपानानि रचयति। तत्र तत्र सोपाने तत् तत् उद्देश्यम् अनुसृत्य पाठयति । प्रयोजनं विना अध्यापनं भवति तर्हि निष्फलं भवति । अध्यापकस्य प्रयोजनं भवति छात्राणाम् अधिगम: । स च अधिगम: उद्देश्यमिशेन अध्यापक: लिखति। उद्देश्यानि तत्र स्पष्टानि स्युः अत: १.सञ्ज्ञात्मकानि उद्देश्यानि, २. मनोगत्यात्मकानि उद्देश्यानि, ३. भावात्मकानि उद्देश्यानि चेति त्रिधा विभज्य अध्यापक: लिखति। अध्यापनेन तानि प्राप्तुं यतते । सोपानमाध्यमेन पाठनं तत: तदुद्देश्यप्राप्ति: तस्य पाठस्य प्रयोजनं भवति। पाठयोजनायां शिक्षकः विभिन्नसोपानेषु उद्देश्यानि लक्ष्यीकृत्य छात्राणां कौशलानां विकासं सम्पादयति यथा -

- अध्यापकस्य आदर्शवाचनेन छात्राणां श्रवणकौशलस्य विकास: भवति ।
- अनुवाचनद्वारा छात्राणां पठनकौशलस्य विकासः भवति ।
- अशुद्धिसंशोधनम् इति पाठयोजनासोपानेन अध्यापक: छात्राणां शुद्धोच्चारणलेखनकौशलयोः विकासं सम्पादयति ।

6) उपदेश: - Instruction

i. लक्षणम् - एवं वर्तितव्यम् इति उपदेश: [१९]। आप्तानुशासनं वा उपदेश: ।

ii. विवरणम् - आचार्यस्य शास्त्रम्, शिक्षणम्, प्रबोधनम् उपदेशो भवति। आप्तानामनुशासनम् उपदेशः इति । यद् यत् करणीयं, सेवनीयं, वेदनीयं तत् तत् सर्वम् आचार्य: उपदिशति । यथा – सत्य वद, धर्मं चर, स्वाध्यायान्मा

प्रमद: इति। एष उपदेशः प्राचीनकाले मौखिकरूपेण प्रवर्तते स्म ततः परं लिखितरूपेण प्रवृत्त:। प्राचीनकाले आप्तानां सर्वं शिक्षणं मौखिकमासीत्। कण्ठस्थीकरणस्य, स्मरणस्य च महत्त्वमधिकं भवति स्म। आचार:, शिष्टता, सभ्यता, संस्कृतिः, देशभक्तिः इत्यादीन् आप्तजनाः छात्रेभ्य: उपदिशन्ति । वेदाः, उपनिषदः, पुराणानि, इतिहास: इत्यादीनां ज्ञानं सम्पाद्य धार्मिकभावनायाश्च संवर्धनाय सच्चारित्र्यसम्पादनाय उपदेश: उपकरोति।

iii. विनियोग: - भावात्मकोद्देश्यानां सम्पादनाय उपदेश: उपकरोति। पाठपाठनात् परम् अनेन पाठेन का शिक्षा प्राप्यते? अस्मासु के गुणा: आयान्ति ? इति अध्यापक: छात्रान् पृच्छति। छात्राणां नैतिकमूल्यानां संवर्धनाय शिक्षणं सम्यक् कर्त्तुं अभिप्रेरणनिमित्तम् आचार्यः उपदिशति अथवा आचार्यस्य उपदेशः अपेक्ष्यते । उपदेशप्रभावेण छात्राः सदाचारगुणान् धारयन्ति । सहिष्णुता, परोपकारः, सत्यवाक्, क्षमाचरणं, दयादाक्षिण्यादयः नैतिकमूल्यानामाधाराः सन्ति। एतेषां नैतिकमूल्यानामाचरणेन छात्राः प्रशंसाभाजः भवन्ति । उपदेशस्य अन्य: एक अर्थः भवति अनुशासनम् । अनुशासनमाभूषणं जीवनम् अलङ्करोति। अनुशासनं हि जीवनस्य सर्वान् कार्यकलापान् प्रभावयति जीवनम् उन्नतं करोति ।

7) नियोग: - Command

i. लक्षणम् - इदमेव कर्त्तव्यमिति नियोग:[२०]।

ii. विवरणम् - नियोगः इत्यस्य तात्पर्यं भवति अनिवार्यतया करणीयम् अत्र कामाचार: नास्ति । यत् किञ्चित् शास्त्रमुखेन तत्र निर्देशः दीयते एतत् कर्त्तव्यम् एतत् न कर्त्तव्यम् इति सा नियोगयुक्तिः उच्यते । नियोगः इति उच्यमाने तत्र अनिवार्यतया पालनं कर्त्तव्यम् ।

iii. विनियोग: - छात्राणां भाषासंवर्द्धननिमित्तं अनिवार्यतया कर्त्तव्यमिति मौखिककार्यम्, अभ्यासः अथवा लिखिताभ्यासः नियोगपुरस्सरं दीयते तर्हि अवश्यम् तत् कर्त्तुम् अर्हन्ति छात्रा:। एतेन छात्रेषु कौशलानां विकास: जायते, परिश्रमस्य गुण: विकसति, कालक्रमेण स्वभावत्वेन परिणमते। यद्

यत् कर्त्तव्यम् अपेक्षितम् अस्ति इति तत् तत् नियोगपक्षेण छात्रैः कारणीयम् । छात्राः तत् कार्यं सम्पाद्य प्रयच्छन्ति । मौखिककार्यं वा भवतु लिखितकार्यं वा भवतु अथवा अन्यत् सामाजिककार्यं वा भवतु यदि नियोगेन कार्यते चेत् व्यवस्था भवति । नियोगेन कार्यते चेत् छात्राः अनुशासने भवन्ति ।

8) विधानम् – Arrangement

i. लक्षणम् - प्रकरणानुपूर्व्यभिहितं विधानम्[२१] । क्रमपूर्वकं उपस्थापनम् विधानम् ।

ii. विवरणम् - प्रकरणानुपूर्व्यभिहितम् विधानम् । यथा - न्यायदर्शने षोडशपदार्थानां क्रमः वर्णितः । षोडशपदार्थज्ञानात्पूर्वं षोडशपदार्थानां क्रमः वेदितव्यः। षोडशपदार्थानां क्रमः भवति – प्रमाणम्, प्रमेयम्, संशयः, प्रयोजनम्, दृष्टान्तः, सिद्धान्तः, अवयवः, तर्कः, निर्णयः, वादः, जल्पः, वितण्डा, हेत्वाभासः, च्छलः, जातिः, निग्रहस्थानम् इति ।

iii. विनियोगः - अध्यापकः कक्षायाम् अध्यापनप्रसङ्गे क्रमिकतया विषयोपस्थापनं कुर्यात् । शिक्षाशास्त्रे क्रमोपस्थापनम् अत्यन्तं महत्वपूर्णं भवति । यथा पाठयोजनायां कश्चन क्रमः भवति तम् क्रमम् अध्यापकः अनुसरति । यदि अध्यापकः पाठ्यसामग्र्यः क्रमबद्धरीत्या प्रस्तौति तर्हि छात्राः द्रुतं न्यूनातिन्यूनदोषान् कृत्वा वाञ्छितोद्देश्यानि प्राप्नुवन्ति । आधुनिककालेऽस्मिन् क्रमबद्धस्य अधिगमस्य उपयोगेन विभिन्नशिक्षासंस्थासु पाठ्यक्रमं निर्माय छात्राणां मानसिकतायाः अनुगुणं शिक्षणं दीयमानं वर्तते । छात्राणां क्रमिकविकासः अनेन अभिक्रमेण सञ्जायते । एकैकं सोपानम् आरुह्य विद्यार्थी उत्तरोत्तरज्ञानं प्राप्तुमर्हति । अध्यापकः यदि पाठयोजनामनुसृत्य पाठयति तदानीं तस्य पाठने कश्चन क्रमः भवेत्, आदौ प्रस्तावना ततः परं विषयस्य उद्देश्यं, व्याख्यानम्, पूर्वपक्षः ततः परं समाधानम्, उपसंहारः अथवा सारकथनम् एवं तत्र प्रत्येकं विषयः क्रमे भवति ।

9) व्याख्यानम् - Explanation

i. लक्षणम् - व्याख्यानं नाम संक्षेपेणोक्तस्यार्थस्य विस्तरेण वर्णनं

व्याख्यानम्[२२]।

ii. विवरणम् - व्याख्यानस्य तात्पर्यम् भवति स्पष्टीकरणं, विवरणम् । शास्त्राणां सम्यग् अर्थप्रतिपत्तये वृत्तिर्व्याख्यानमनिवार्यम् । भाष्यकारः महाभाष्ये प्राह व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणम् [२३] इति । तथा च व्याख्यानस्य लक्षणम् -

पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना ।
आक्षेपोऽथ समाधानं व्याख्यानं षड्विधं मतम् [२४]।।

सूत्राणां पदच्छेदं विधाय पदार्थं संबोध्य समासविग्रहं विधाय अर्थप्रतिपत्तिं कृत्वा, पदानि यथाक्रमं सार्थकं संयोज्य, तद् गतार्थं प्रतिपाद्य, तदुपरि पूर्वपक्षरूपेणाक्षेपं विधाय, तस्य समाधानं कृत्वा निश्चितसिद्धान्तस्थापनम् अर्थनिष्पतिः व्याख्यानं भवति । एवं षड्भिरुपायैः साधनैः सूत्रार्थः सूत्रव्याख्यानं वा कार्यम्। अपरे केचन व्याख्यानस्य लक्षणमेवमाहुः

सूत्रार्थश्च पदार्थश्च हेतुश्च क्रमशस्तथा ।
निरुक्तम् अथ विन्यासो व्याख्या योगस्य षड्विधा [२५]।।

iii. विनियोग: - पाठयोजनायां कठिनविषयाणाम् अत्यन्तसरलतया बोधगम्यरीत्या स्पष्टीकरणं व्याख्यानम् भवति। अध्यापनकाले व्याख्यानं पाठस्य हृदयभाग: भवति । सर्वे जटिला: दुरुहा: विषया: व्याख्यानेनैव स्पष्टा भवन्ति। भाष्यकार: एवं वर्णयति यत्र यत्र विषयेषु सन्देहे जाते सति सन्देहानाम् अपाकारणं, संशयानाम् दूरीकरणं आक्षेपाणां समाधानम् व्याख्यानेन भवति। अध्यापनकर्मणि अध्यापकस्य सर्वाधिकं महत्त्वपूर्णं कार्यं व्याख्यानं भवति।

10) पदार्थ: Word meaning

i. लक्षणम् - पदार्थो नाम पदेनार्थो गम्यते[२६]।

ii. विवरणम् - पदस्य पदयो: पदानां वाऽर्थ: पदार्थ: अपरिमिताश्च पदार्था:। पदार्थ इत्यस्य तात्पर्यम् अस्ति पदस्य अर्थ:। पदार्थ: इत्यस्य तात्पर्यं भवति पदस्य, पदयो:, पदानाम् अर्थप्रकटीकरणम् । शब्दात् जायमान यः बोधः अस्ति स एव बोधः शब्दार्थ: पदार्थ: वा भवति । ततः परं पदार्थानाम्

समुच्चयेन वाक्यार्थबोधः भवति ।

iii. विनियोग: - अध्यापकः पद्यशिक्षणे एकैकस्य पदस्य पदार्थं बोधयेत्, गद्यशिक्षणे कठिनशब्दानाम् पदार्थान् ब्रूयात् । पदार्थान् स्पष्टीकृत्य एव विषयस्य अवबोधः भवितुम् अर्हति । पदानाम् अर्थस्पष्टीकरणाय नैकप्रविधय: सन्ति । यथा- निर्वचनेन, कोशेन, ऐतिह्यप्रसङ्गेन, व्युत्पत्या, विलोमपदेन, समानार्थकपदेन च ।

11) संशय: - Doubt

i. लक्षणम् - संशयो नाम साकांक्षत्वमनिश्चितमस्तु विज्ञानम्[२७]। उभयतो हेतुमान् अर्थ: संशय: ।

ii. विवरणम् – एकधर्म्मिकविरुद्धभावाभावप्रकारकं ज्ञानं संशय इत्यर्थः । उभयसाधारणो यो धर्म्मस्तज्ज्ञानं संशयसाधनम् । यथा - उच्चैस्तरत्वं स्थाणुपुरुषसाधारणं ज्ञात्वा अयं स्थाणुर्न वेति। एकस्मिन् धर्म्मिणि विरुद्धनानार्थावमर्श:।

उभयकोटिस्पृग्विज्ञानं स्यादिदमेवं नैवं स्यादिति[२८]।

iii. विनियोग: - साम्प्रतिकी छात्रकेन्द्रिता शिक्षा भवति। छात्रास्तु जिज्ञासवो भवन्ति । अध्यापकः नूतनविषयं यदा प्रस्तौति तदा तद्विषयकशंका जायते स्वभाविकम् एतत् , तदानीम् अध्यापकः तां शंकां सम्यक् विचार्य यथोचितरीत्या शंकायाः समाधानं कुर्यात् । छात्राणां कृते संशयनिमित्तम् अवसरः देय: । यदि छात्राः सन्देहं कुर्वन्ति ततः परमेव विषयस्य सम्यक् स्पष्टीकरणं भवति अर्थात् सन्देह: अपरदृष्ट्या पूर्वपक्षः भवति । पूर्वपक्षस्य निराकरणेन सिद्धान्तपक्षः दृढ: भवति । विषयस्य अवगमनं सम्यग् जायते । यदि अध्यापकः कमपि विषयं पाठयति तर्हि आदौ तत् छात्राणां कृते नूतनं भवति तत्र संन्देह: जायते अत एव ते छात्रा: संन्देहान् प्रकटीकुर्वन्ति तदानीम् अध्यापकः तान् प्रेरयति, संदेहानां समाधानं करोति तदा च्छात्रा: उत्साहेन पठन्ति । यदि छात्रान् निराकरोति, तर्जयति, तर्हि छात्राः उत्साहिनः न भवन्ति, पठने विमुखाः भवन्ति, अतः यद्यपि छात्रेषु संन्देहा: जायन्ते चेत् मनोवैज्ञानिकदृष्ट्या सन्देहानां समाधानं अध्यापकेन विधातव्यम् ।

12) निर्वचनम् – Etymological Definition

i. लक्षणम् -निर्वचनं नाम निर्णयार्थवचनं निरुक्तैः[२९]। निर्वचनम् नाम निरुक्तम् ।

ii. विवरणम् - शास्त्राध्यापनवेलायां तत्र बहूनि पदानि आयान्ति तेषां पदार्थविषये संशयः भवति, अतः तेषां पदानां यदि शास्त्रीयनिर्वचनं वयं कुर्मः तर्हि यथार्थबोधो भवति ।

iii. विनियोग: - अध्यापकः पाठनप्रसङ्गे आचार्यः इति पदस्य कः अर्थः भवति? इति पृच्छति तदा तस्य पदस्य अर्थ: अध्यापक: शिक्षक: इति कथने समीचीनं न प्रतिभाति। यदि आचारं ग्राहयति आचिनोति अर्थान्, आचिनोति बुद्धिमिति वा[३०] निर्वचनपुरस्सरं बोधयति तर्हि तेन आचार्यपदं स्पष्टं भवति । एवंरीत्या संस्कृतपदानां, शास्त्रीयपदानां प्रसंगे निर्वचनम् विधातव्यम्। तेन तस्य शास्त्रीयवचनं प्रसङ्गश्च स्पष्टं भवति।

13) पूर्वपक्ष: - The prima facie Argument

i. लक्षणम् - आक्षेपपूर्वक: प्रश्न: पूर्वपक्ष: [३१]।
पूर्वपक्षो नाम आक्षेपयुक्तैः वचनै: उक्तविषये आपत्तिप्रस्तावः विप्रतिपत्तिर्वा ।

ii. विवरणम् - आक्षेपपक्ष: नाम सिद्धान्तभिन्नपक्षः ।

iii. विनियोग: - अध्यापकः यदा साहित्यं, व्याकरणम् अथवा आधुनिकज्ञानविषयकं पाठं पाठयति, तदानीं स्वभाविकतया तत्र छात्राणां मनसि संशयः जायत। यत्र यत्र अवबोधः सम्यक् न भवति तत्र तत्र संशयः जायते। तर्हि संशयकारणेन सिद्धान्तभिन्न: पूर्वपक्षः उपतिष्ठति । यदि छात्रः तत् तत् विषयकं पूर्वपक्षं न उत्थापयति तर्हि अध्यापकः स्वयम् अपि पूर्वपक्षम् उपस्थापयेत् । पूर्वपक्षान् आदाय समाधानम् दद्यात् । तेन तस्य विषयस्य समग्रज्ञानं भवेत् । अधिगमात् पूर्वं तद् विषयकसन्देहं उपस्थापयेत्, पूर्वपक्षं प्रस्तूयात् । सिद्धान्तवाक्यस्य प्रतिषेधवचनम् पूर्वपक्षः, यथा व्याकरणे तत्र पूर्वपक्षरूपेण भाष्यकारः बहून् प्रश्नान् पूर्वपक्षान् प्रस्तौति । समाधानान्यपि प्रयच्छति ।

14) उत्तरपक्ष: - Solution

i. लक्षणम् - उत्तरपक्षो नाम आक्षेपाणां तार्किकं समाधानम्[३२] ।
ii. विवरणम् – विचारितस्य अर्थस्य व्यवस्थापनम्। सिद्धान्तानुकूलतर्कोपन्यासः।
iii. विनियोग: - यदा अध्यापकः व्याख्यानावसरे कमपि विषयम् आधारीकृत्य पाठयति तदानीं सन्देहो जायते । सन्देहाधारेण पूर्वपक्ष उपस्थाप्यते । तेषां पूर्वपक्षाणां यथोचितरीत्या तार्किकरीत्या समुचितसमाधानम् उत्तरपक्षः इति उच्यते । अध्यापनवेलायां यदा व्याख्यानं भवति तर्हि तत्र समाधानपक्षरूपेण सिद्धान्तपक्ष: उपस्थीयते स एव सिद्धः भवति । अध्यापने यावत्यः तत्र शंकाः समस्याः भवन्ति ताः शंकाः समस्याः निरास्य तावतां पक्षाणां समाधानम् अध्यापक: प्रस्तौति । स एव उत्तरपक्षः सिद्धान्तपक्षः भवति , अर्थात् विषयस्य संशयरहितम् अवगमनं वा अधिगमः उत्तरपक्ष इति उच्यते । संशयनिरासपूर्वकं स्पष्टीकरणं उत्तरपक्षः भवति ।

15) उद्धार: - Defending one's statement by condemning the opposite one

i. लक्षणम् - उद्धारो नाम परपक्षदूषणं कृत्वा स्वपक्षोद्धरणम्[३३] ।
ii. विवरणम् - उद्धारे तु द्वयं समाविशति पूर्वपक्षस्य खण्डनं स्वपक्षस्य मण्डनम्, एतत् द्वयं सम्भूय उद्धारः भवति । यदा छात्रा: शंकाः कुर्वन्ति तर्हि अध्यापकः शंकानां निराकरणं करोति। छात्रा आक्षेपान् कुर्वन्ति एतद् एवं नास्ति इति। एतस्य आक्षेपस्य खण्डनम् कृत्वा स्वीयमण्डनम् अध्यापक: करोति स उद्धारः उच्यते ।
iii. विनियोग: - कक्षायां छात्राः परस्परं संवादं कुर्वन्ति, चर्चां कुर्वन्ति तदानीं छात्राणां मध्ये अयुक्तमतस्य खण्डनम्, युक्तमतस्य मण्डनम् भवति । परपक्षस्य निरास: स्वपक्षस्य स्थापनम् उद्धारः अस्ति । कक्षायाम् अध्यापकः अपि प्रतिपाद्यविषयम् अथवा पाठ्यमानविषयं यदा प्रस्तौति, तदानीं छात्रा: शंका: कुर्वन्ति आक्षिपन्ति च तदानीं अध्यापकः छात्राणाम् आक्षेपाणां खण्डनम् करोति समुचितपक्षस्य च मण्डनम् करोति एवं असत् पक्षस्य खण्डनम् सत् पक्षस्य मण्डनम् उद्धारः इति उच्यते ।

16) निदर्शनम् - Example

i. लक्षणम् - दृष्टान्तव्यक्तिः निदर्शनम्[३४]।

ii. विवरणम् - निदर्शनम् इत्यस्य तात्पर्यं अस्ति दृष्टान्तः अथवा उदाहरणम् ।

iii. विनियोगः - अध्यापनकौशलेषु अन्यतमं कौशलम् उदाहरणप्रदानकौशलमस्ति अतः सूक्ष्मशिक्षणे अपि उदाहरणप्रदानकौशलस्य अभ्यासः कार्यते, अपि च अध्यापकः पाठनावसरे पाठ्यमानविषयस्य पुष्ट्यर्थं हेतुं प्रयच्छति ततः हेतोः अनन्तरम् उदाहरणं यच्छति एतेन विषयः सम्यक् बोध्यते अतः उत्तमः अध्यापकः उत्तमाध्यापननिमित्तं बहूनि उदाहरणानि यच्छति तदेव निदर्शनम् उच्यते । कस्यचित् विषयस्य प्रतिपादनार्थं पञ्चयुक्तिवाक्यानामावश्यकता वर्त्तते। परार्थानुमानेन पञ्चयुक्तिवाक्यैः प्रतिज्ञा, हेतुः , उदाहरणम्, उपनयः, निगमनम् इति एभिः तार्किकरीत्या विषयनिरूपणं क्रियते । तत्र तृतीयम् युक्तिवाक्यम् उदाहरणस्य भवति तदेव निदर्शनमिति उच्यते। अत्र पर्वतः वह्निमान् अस्ति इत्यस्य निरूपणं यत्र यत्र धूमस्तत्र तत्र वह्निर्यथा महानसे इति उदाहरणमन्तरेण न सम्भवति ।

17) उपमानम्

i. लक्षणम् - प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्[३५] ।

ii. विवरणम् - उपमानम् एकं प्रमाणम् अस्ति सादृशाधारेण कश्चन बोधः कार्यते यथा – गौरिव गवयः । कश्चिद् गवयं न जानाति चेत् गौ तेन दृष्टा तर्हि गोः सदृशः गवयः भवतीति विज्ञाःजनाः तं जनं बोधयन्ति ,ततः परम् अयं जनः गोः आकृतिं मनसि निधाय अरण्ये प्रविशति तदानीम् सः गोः सदृशं प्राणिनं पश्यति। अयं गवयः एव अस्ति इति निश्चिनोति । अत्र उपमानप्रमाणेन सादृशताधारेण अज्ञातविषयस्य बोधः भवति ।

iii. विनियोगः - यदि कश्चित् बालः गवयं न जानाति तर्हि तं जनं जेष्ठः जनः बोधयति गवयसदृशः प्राणी गौः भवति इति। अध्यापकः अपि निदर्शनेन गौरिव गवयः सूचयति । एतस्य कौशलस्य प्रयोगार्थं शिक्षकः पूर्वमेव समुचितसादृश्यदृष्टान्तानां सादृश्य - उदाहरणानां वा चयनं कुर्यात् । तान्

सादृश्यदृष्टान्तान् कक्षायां प्रस्तूयात् । उपमया सादृश्याधारेण प्रकृतविषयबोध: कार्यते । कालिदास: स्वकाव्येषु उपमानस्य भृशं प्रयोगमकार्षीत्, अत एव कालिदासस्य प्रसिद्धि: उपमा कालिदासस्य इति अस्ति यथा -

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥[३६]

अपि च

तस्याः खुरन्यासपवित्रपांसुमपांसुलानां धुरि कीर्तनीया।
मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत् ।।[३७]

अत्र पार्वतीपरमेश्वरौ कथं संश्लिष्टौ तौ वागर्थौ इव सम्पृक्तौ इति उपमया बोधयति। द्वितीयश्लोके सुदक्षिणा कथं पदक्रमणं करोति तद् उपमया सूचयति यथा स्मृति: श्रुते: अर्थम् अनुसरति तद्वत्। अनेन जटिलविषयोऽपि सुखेन बुध्यते। अध्यापकः अपि कक्षायां विषयप्रतिपादनवेलायां उपमानाधारेण बहून् विषयान् बोधयति ये विषयाः तत्र कक्षायां न भवन्ति परोक्षे भवन्ति तान् अपि उपमानेन बोधयति । उपमानप्रमाणं विषयबोधनवेलायां महद् उपकरोति ।

18) ऊह्यम् – Deduction

i. लक्षणम् - यदनिर्दिष्टं बुध्याऽवगम्यं तदूह्यम्[३८]। अनुक्तकरणमुह्यम् । अत्र यदनिर्दिष्टं युक्तिगम्यं तदूह्यमिति। ऊहो विज्ञातमर्थमवलम्ब्य अन्येषु तथाविधेषु व्याप्त्या वितर्कणम् ।
ii. विवरणम् – शास्त्रे यन्न निर्दिष्टम् अध्यापक: स्वप्रज्ञाबलेन युक्त्या वा तद् व्यक्तीकरोति स्फोरयति एतदेव ऊह्यमित्युच्यते। अध्यापकः अदृष्टविषय: य: प्रत्यक्षं नास्ति तम् विषयम् अपि अनुमानप्रमाणेन प्रमाणीकरोति, स्वप्रज्ञाबलेन युक्त्या वा साधयति। ऊह्यम् अनुमानप्रमाणम् इव अस्ति । अनुमितिकरणं अनुमानम् । अनुमीयते अनेन इति अनुमानम् । प्रत्यक्षप्रमाणेन यत् वस्तु न सिध्यति तस्य सिध्यर्थं अनुमानप्रमाणस्य

आवश्यकता अस्ति । अनुमानप्रमाणस्य उदाहरणं - पर्वते धूमं दृष्ट्वा पर्वतो वह्निमान् इति अनुमानम् । तथैव यत्र यत्र धूमः तत्र तत्र अग्निः । कारणं दृष्ट्वा कार्यस्य अनुमानम् यथा मेघं दृष्ट्वा वृष्टेः अनुमानम् । सामान्यतः दृष्टस्य अनुमानेन तस्य विशिष्टरूपं सामान्यतोदृष्टम् अनुमानम् । अस्य उदाहरणं - प्रातःकाले पूर्वदिशि सूर्यं दृष्ट्वा पश्चात् सायंकाले पुनः पश्चिमदिशि दृष्ट्वा अनुमानं क्रियते यत् सूर्यस्य गतिः अस्ति ।

iii. विनियोग: - अध्यापने अनुसन्धाने अधिगमे च सर्वत्र उह्येन अतर्कितमपि साधयन्ति बुद्धिमन्त: । सर्वक्षेत्रेषु उह्यमाध्यमेनैव जवेन विकासो जायमानो विद्यते। कश्चित् समस्याया: समाधानविषये, फलविषये, सम्भावनाविषये वा एवं भवितुं अर्हति इति ऊहनम् कल्पनम् करोति तद् ऊह्यं भवति, तद् आधारेण समाधानम् अन्वियते । अध्यापकः छात्रेषु तर्कप्रवृत्तिवर्द्धनार्थं भिन्नभिन्नसमस्यापरिस्थितिं उद्भाव्य छात्रेषु ऊह्यप्रवृत्तिं जनयति । नूतनकल्पनाधारेण नूतनभव्यदिव्यरचनासु उपकरोति । यथा - अध्यापकः यदा कक्षायां पाठयति तदा छात्रा: विद्यमानसमस्याविषये वा सम्भावितसमाधानविषये वा ऊहनम् कुर्वन्ति तेन ते समाधानदिशि प्रवृत्ता भवन्ति । ऊह्यम् एकं बौद्धिककार्यं अस्ति । यदा अध्यापक: कक्षायां छात्रान् पाठयति तदा तस्य अत्यधिकं कार्यम् ऊह्यमाध्यमेन एव प्रवर्त्तते ।

19) अतिक्रान्तवेक्षणम् – Retrospection, Reference to a past statement

i. लक्षणम् - अतीतावेक्षणं नाम यदतीतमेवोच्यते[३९]।

ii. विवरणम् - यथापूर्वोक्तस्य पुन:कथनम् अतितावेक्षणम्।

iii. विनियोग: - अध्यापकः यदा कक्षायां पाठयोजनानुसारम् उद्देश्यानि मनसि निधाय तद् अभिलक्ष्य पाठयति । पाठनस्य उपान्ते यद् यत् पाठितम् तत् तत् सम्यक् सर्वं स्पष्टं जातम् न वेति एकवारं पुनः मुख्यानाम् अंशानामवेक्षणं करोति । पाठितविषयस्य मुख्यांशपुनरावृत्ति: क्रियते चेत् च्छात्रा: उपकृता भवन्ति। आदर्शशिक्षकाः अध्यापनात् प्रागेव अध्याप्यमानस्य विषयस्य पूर्वसिद्धताम् अवश्यं कुर्युः । क्रमबद्धरीत्या शिक्षणं कुर्यु: कृतशिक्षणस्य

समीक्षणमपि विद्ध्यु: ।

20) अनागतावेक्षणम् – Anticipation, Reference to a future statement

i. लक्षणम् - एवं वक्ष्यतीत्यनागतावेक्षणम्[४०] ।

ii. विवरणम् - अनागतावेक्षा नाम यत्रानागतेनार्थेन सम्बन्धिता भवति साऽनगतावेक्षा ।

iii. विनियोग: - अध्यापकः पाठनवेलायां कमपि विषयं यदा आरभते तर्हि तत्र बहवः विषयाः समापतन्ति । आदौ सरलसरलविषयान् स्पष्टीकुर्वन् अग्रे गच्छति । तत्र प्रवाहे यदि कश्चन जटिल: अंश: आयाति तर्हि वदति अग्रे एतस्मिन् विषये स्पष्टीकरोमि इति । यः मुख्यविषयः अस्ति तद् वर्जयित्वा अन्यत्र न गच्छति अन्यविषयः इह अप्रधानः अस्ति एतदर्थं अनागतवेक्षणम् एतस्मिन् विषये वयं अग्रे वक्ष्यामः इति वदति, । एतत् तत्र स्पष्टीकुर्मः । प्रधानप्रकृतविषयम् उपसर्जनीकृत्य विषयान्तरे न गच्छेयम् इति धिया अग्रे वक्ष्यामि इति आध्यापक: वदति अथवा तस्मिन् प्रकरणे विस्तरेण स्पष्टीकुर्म: इति वदति । शिक्षाशास्त्रे व्याख्यानवेलायां अध्यापकः प्रकरणम् आधारीकृत्य पाठं पाठयति परन्तु यः विषयः इदानीं न आयाति तस्य प्रसङ्ग: यदि तस्मिन् प्रकरणे आयाति तदानीं अध्यापकः तस्मिन् विषये अपि छात्रेभ्य: स्वल्पं ज्ञानं ददाति, विस्तरविवरण्म् अग्रे करोति । अर्थात् अनागत: यः विषयः अस्ति अधुना न आगतः आगामिनि प्रसंगे आगमिष्यति अधुना तद् विषयक: प्रसङ्ग:नास्ति इति मत्वा किञ्चिद् एव उच्यते ।

21) प्रसङ्ग: - Restatement, connected Reasoning or Argument

i. लक्षणम् - प्रसंगो नाम पूर्वाभिहितस्यार्थस्य प्रकरणतत्वादिना पुनरभिधानम्[४१] । अन्योद्देशेन प्रवृत्तावन्यस्यापि सिद्धिः ।

ii. विवरणम् - पूर्वं यत् वर्णितम्, यत् स्पष्टीकृतम् पुनः प्रसङ्गे सति अथवा पुनः प्रकरणे आगते सति तस्य वर्णनम् स्पष्टीकरणं प्रसंगः इति उच्यते ।

iii. विनियोग: - अध्यापकः यदि अध्यापनवेलायां उद्देश्येषु इमानि उद्देश्यानि

साधयाम इति वदति तर्हि तानि उद्देश्यानि तत्तत्सोपाने तत्र व्याख्यानप्रसङ्गे विषयप्रसङ्गे आगते सति तस्य स्पष्टीकरणं करोति तत्तत्साधयति च । यथा - अध्यापकः काठिन्यनिवारणप्रसङ्गे काठिन्यनिवारणं करोति ततः परं पुनः तस्य यदा विस्तरव्याख्यानम् करोति पुनः तत्र प्रसङ्ग: आयाति चेत् तत्रापि पुनः तस्य स्पष्टीकरणं करोति । काठिन्यनिवारणप्रसङ्गे केवलं पदवाक्यदृष्ट्या काठिन्यनिवारणं करोति, व्याख्यानप्रसङ्गे व्याख्यानदृष्ट्या पुनः एकवारं स्पष्टीकरणं करोति । एतत् अतिरिच्य यदा सारांशकथनम् करोति तत्रापि पुनः प्रसङ्गे आगते सति पुनः एकवारं संक्षेपेण तस्य स्पष्टीकरणं भवति । ये कठिनाः अंशाः भवन्ति, कठिनाः शब्दा: भवन्ति, कठिनानि तत्त्वानि भवन्ति तेषां स्पष्टीकरणं प्रसङ्गे प्रसङ्गे एव क्रियते । अध्यापकः विषयस्य दृढतायै तस्य पूर्वकथितप्रसंगस्य पुनः प्रसंगे सति स्पष्टीकरणं करोति। उपनिषत्स्वपि पूर्वं स्पष्टीकृतस्य विषयस्य दृष्टान्तभेदेन पुन: स्पष्टीकरणं कुर्वन्ति ऋषय: । अत्र एवं न मन्तव्यं यदत्र पुनरुक्ति: विद्यते इति। विषयस्य पुन: पुन: स्पष्टीकरणं विषयस्य दृढतायै स्पष्टतायै क्रियते ।

उपसंहार: - शास्त्रतत्त्वसुखबोधाय शास्त्रेषु या: तन्त्रयुक्तय: परिगणिता: ता: क्रोडीकृत्य विस्तरविवरणपुरस्सरम् उपन्यस्तम्। शिक्षाशास्त्रे नानाविषया: शिक्षणाधिगमसम्बद्धा: भवन्ति। तत्र रचनापक्ष:, अभिव्यक्तिपक्षश्च प्रामुख्येन भवत: । इमा: तन्त्रयुक्तय: अध्यापकस्य शिक्षणकौशलं संवर्धयन्ति। अध्यापक: शिक्षणकर्मणि पाठ्यविषयम् अवगमयितुं नानाक्रियाकलापान् करोति, तेषु कर्मसु यदि निपुणतया युक्ते काले युक्ते प्रसङ्गे यत्र या तन्त्रयुक्ति: युक्ता भवति तत्र तां तन्त्रयुक्तिं प्रयुङ्क्ते तर्हि तस्य शिक्षणं प्रभावि फलेग्रहि च भवति। छात्रा: अपि आनन्देन लीलया पाठस्य अधिगमं प्राप्नुवन्ति। अध्यापक: पाठपाठनात् प्राक् यानि उद्देश्यानि निश्चिनोति, तानि उद्देश्यानि प्राप्तुं प्रभवति। विस्तरभिया इह तु केवलं दिङ्मात्रनिर्देश: कृत: विद्यते। अध्यापक: स्वीयविवेकेन तन्त्रयुक्ती: उपयुज्य अध्यापनं बोधगम्यं रुचिरं प्रभावि च कर्तुं प्रभवति।

सन्दर्भसूची

1) Sharma, १९४९, p.१

2) सुभाषित रत्न संग्रह पृ. १९४

3) अजितागमः, १.११५
4) चरकसंहिता. ११. २५
5) अ.उ.५०.१५५, अरुणदत्तः, सर्वाङ्गसुन्दरा, पृ.९२
6) चरकसंहिता १२.६
7) चरकसंहिता ८.१२.४१-४४
8) चरक-सूत्रस्थानम्१/६
9) योगदर्शन १.१
10) अष्टाध्यायी १.१.१
11) सर्वदर्शनकौमुदी
12) चरकसंहिता १२/४१
13) संस्कृतशिक्षणम्- नवीनप्रविधयश्च पृ.८६
14) भाषावृत्तिः पृ. १६
15) मेघदूतम् – संजीवनीटीका मङ्गलाचरणप्रसङ्गे
16) कौटिल्य अर्थशास्त्रम् ५६-२४२
17) चरकसंहिता -१२/४२
18) विष्णुधर्मोत्तरपुराणम् ३/६
19) कौटिल्य-अर्थशास्त्रम्-१५/८
20) सुश्रुतसंहिता ६८/३७
21) सुश्रुतसंहिता.६५/२९
22) विष्णुधर्मोत्तरपुराणम्
23) महाभाष्यम् पस्पशा
24) भाषावृत्तिः पृ. १६
25) विष्णुधर्मोत्तरपुराणम् ३.५.११
26) अष्टाङ्गहृदयम् उत्तरस्थानम् ४०/४
27) (अष्टाङ्गहृदयम्४०/२४)
28) योगसूत्रम्- ३० व्यासभाष्यम्
29) अष्टाङ्गहृदयम् ४९/३१
30) निरुक्तम्, १.२.४.
31) सुश्रुत.उत्तरतन्त्रम्२२
32) कौटिल्य-अर्थशास्त्रम्-

33) चरकसंहिता २८/२९
34) सुश्रुतसंहिता.उत्तरतन्त्रम्
35) न्यायसूत्रम् १.१.६
36) रघुवंशम् १/१
37) रघुवंशम् २/२
38) सुश्रुतसंहिता ६५/८-१०
39) चरकसंहिता ८/२९
40) सुश्रुतसंहिता ६५/२६
41) चरकसंहिता.१२/४३

सन्दर्भग्रन्थसूची

1) शास्त्री पण्डित चारुदेव १९९६, वाक्यपदीयम्, मोतीलाल बनारसीदास, दिल्ली
2) जिज्ञासु पं. ब्रह्मदत्त सम्पादक: अष्टाध्यायी, १९९८, राम लाल कपूर ट्रस्ट, रेवली, हरियाणा
3) मीमांसक पं. युधिष्ठिर १९९२, संस्कृतव्याकरणशास्त्र का इतिहास, राम लाल कपूर ट्रस्ट, रेवली, हरियाणा
4) जिज्ञासु पं. ब्रह्मदत्त, प्रथमावृत्तिः, १९९०, राम लाल कपूर ट्रस्ट, रेवली, हरियाणा
5) विद्यावारिधि आचार्य विजयपाल, १९९७, काशिका, राम लाल कपूर ट्रस्ट, रेवली, हरियाणा
6) शास्त्री भार्गव, १९८७,पाणिनीयव्याकरणमहाभाष्यम्, चौखम्बा संस्कृत प्रतिष्ठान , दिल्ली
7) अग्रवाल वासुदेवशरण, १९९६, पाणिनिकालीन भारतवर्ष, चौखम्बा विद्याभवन, वाराणसी
8) पं. आशुबोधविद्याभूषण:, २०००, न्यायदर्शनम्, चौखम्बा संस्कृत प्रतिष्ठान, वाराणसी
9) शास्त्री ढुण्डिराज, १९९८, न्यायसिद्धान्तमुक्तावली, चौखम्बा संस्कृत प्रतिष्ठान, वाराणसी
10) शास्त्री पं.उदयवीर, १९९५, वैशेषिकदर्शनम्, गोविन्दराम हासानन्द, दिल्ली,
11) डा. अनन्तराम शर्मा,२०१५, सुश्रुतसंहिता, भाग १,भाग-३, चौखम्बा सुरभारती प्रकाशन, वाराणसी
12) Bhadakamkar, H.M. १९८५, The Nirukta of Yaska,भण्डारकर ओरियन्टल् रिसर्च इन्स्टिट्युट, पुणे
13) अत्रिदेवगुप्त,अनुवादक१९४८, चरकसंहिता, महर्षि अग्निवेश प्रणीत, प्रथम खण्ड, द्वितीय खण्ड, द्वितीय संस्करण , भार्गव पुस्तकालय गयाघाट बनारस
14) शास्त्री गणपति,कौटिल्य-अर्थशास्त्रम्, राष्ट्रियसंस्कृतसंस्थान, दिल्ली
15) शर्मा डा. भीष्मदत्त,२०१२, ऋग्वेदसंहिता, प्रथमभाग, चौखम्बा कृष्णदास अकादमी, वाराणसी,

16) त्रिपाठी डा. ब्रह्मानन्द,१९९८,चौखम्बा संस्कृत प्रतिष्ठान,दिल्ली
17) विष्णुधर्मोत्तरपुराणम् अनुक्रमणिकासहित, मूलमात्र । इस्टर्न बुक लिंकर्स, दिल्ली
18) त्रिपाठी, डा. श्रीकृष्णमणि,२०००, रघुवंशम्, चौखम्बा संस्कृत प्रतिष्ठान, वाराणसी
19) Lele, W. K. (२००६) Methodology of Ancient Indian Sciences, Chaukhamba Surbharati Prakashan, Varanasi
20) Neelmegh Bhishagacharya, १९७६ Tantra yukti vichara. Vaidyasarathy Press, Kottayam
21) Bloom, Benjamin Samuel, १९५६, Taxonomy of Educational Objectives, Longmans, Green
22) शर्मा, डा. च.ल.ना. डा.फतेहसिंहः, २००८, संस्कृतशिक्षणम् - नवीनप्रविधयश्च, आदित्य प्रकाशनम्, जयपुरम्।
23) शर्मा प्रो. मुरलीधर, सम्पादक २००३, संस्कृतशिक्षणसमस्याः, राष्ट्रियसंस्कृतविद्यापीठ, तिरुपति।

❋ ❋ ❋

सिद्धपदस्थलिङ्गेभ्यः अन्वाख्यानरीतिः

चैतन्यः सु लक्कुण्डी
प्रो. शिवानी वि

भूमिका :

"प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं किं पुनरियता सूत्रेण।" इत्याह महर्षिः पतञ्जलिः पस्पशाह्निके पाणिनिमुनेः प्राशस्त्यं प्रकटयन्। अष्टाध्यायीग्रन्थद्वारा साधुशब्देभ्यः असाधुशब्दाः पृथक्क्रियन्ते। साधुशब्दनिष्पादनार्थं सूत्राणि क्रमेण सञ्चरन्ति। सूत्रसञ्चारस्य क्रमः प्रक्रियाद्वारा ज्ञायते। सिद्धे नाम निष्पन्ने पदे प्रत्ययस्य कश्चन अंशः एव अवशिष्यते अनुबन्धाद्यंशाः लुप्यन्ते। आदेशागमलोपविधानात् प्रत्ययेषु विकाराः अपि जायन्ते। गोचरान् अंशानेव आधृत्य पदान्वाख्यानं कथं साध्यमिति अस्य शोधपत्रस्य विषयः। कियत् पर्यन्तं प्रत्ययाः अनुमातुं शक्या इत्यपि विचार्यते।

Keywords: लिङ्गम्, चिह्नम्, प्रत्ययः, अनुमानम्, अन्वाख्यानम्, प्रक्रिया

मूलम् :

पञ्चभिः वृत्तिभिः समन्वितायां अष्टाध्याय्यां बहुधा प्रत्ययाः उपदिष्टाः। प्रत्याय्यते अर्थः अनेन इति प्रत्ययः। अर्थं संप्रत्याययति स प्रत्ययः इत्येवं महाभाष्ये प्रस्तुतम्। प्रत्येति पश्चादागच्छति इति प्रत्ययः परः इत्यपि प्रत्ययस्य लक्षणम्। प्रत्ययेषु सुप्- तिङ्- कृत्- स्त्री- विकरण- तद्धित- सनादयः गणनीयाः। सुबादयः एकविंशतिः, तिङादयः परस्मैपद- आत्मनेपदभेदेन अष्टादश, त्रिशताधिकाः कृतः, दश स्त्रीप्रत्ययाः, दश विकरणाः, द्विशताधिकाः तद्धिताः बहुष्वर्थेषु, द्वादश सनादयश्च। एतेषु पुनः तिङ्- कृत्- विकरण- सनादयः सामान्यतया धातुभ्यः, अन्ये च प्रातिपदिकेभ्यः विहिताः। स्त्रीत्वविवक्षायां च स्त्रीप्रत्ययाः विधीयन्ते। तृतीयाध्यायात् आपञ्चमाध्यायपरिसमाप्तेः एते प्रत्ययाः विहिताः। अन्ये च औणादिकाः उणादयो बहुलमिति सूत्रेण परिग्रहीताः। पदनिष्पत्तिप्रक्रियायां प्रत्ययाः शब्दस्वरूपं निर्णीय कारकाद्यर्थान् द्योतयन्ति। केचन वाचकाः केचन द्योतकाश्च भवन्ति। प्रकृत्यर्थमेव

बोधयन्ति चेत् द्योतकाः। स्वार्थं बोधयन्ति चेत् वाचकाः। वाचकत्वं द्योतकत्वं च प्रत्ययानां सन्दर्भायत्तम्।

प्रत्ययाः सामान्यतया इत्-वर्णैः अनुबद्धाः भवन्ति। यथा घञ्, ण्वुल्, णिच्, तिप् इत्यादिषु ञणपादयः इत्-संज्ञकवर्णाः। अनुबन्धलोपोत्तरं प्रत्ययस्य कश्चन मूलांशः अवशिष्यते। तं निरनुबद्धं मूलांशम् आधृत्य सारूप्यनिर्णयः क्रियते वाऽसरूपादिविधिषु। तद्यथा- अण् णः घञ् इत्यादिषु अ इत्यवशिष्यते मूलांशः। टाप् डाप् चाप् इत्यादिषु आ इति मूलांशः। अवधेयं यत् यद्यपि मूलांशः समानः स्यात् प्रत्ययाधिकारमाश्रित्य विभिन्नकार्याणि भवितुमर्हन्ति। यथा अणः तद्धितकार्याणि प्राप्नुवन्ति तद्धिताधिकारे पठितत्वात्। घञ्-प्रत्ययः कृत्-कार्याणि लभते तत्रोक्तत्वात्।

अस्मिन् लेखे इत ऊर्ध्वं पदस्य केषां धर्माणाम् अनुमानं शक्यमिति सङ्क्षेपेण उच्यते। विस्तरेण केषाञ्चन पदानां चर्चा लेखस्य अन्ते उपनिबद्धा।

क) प्रत्ययावशेषान् दृष्ट्वा मूलप्रत्ययस्य अनुमानम्

सोपानक्रमेण पदनिष्पत्तौ विविधाः आकाङ्क्षाः उद्भवन्ति। तत्र सामान्यतया लिङ्ग-विभक्ति-वचनादिकं सुबन्तेषु, अपिच लकार-पुरुष-वचनानि तिङन्तेषु। प्रत्ययप्रकारं दृष्ट्वा प्रक्रिया प्रवर्तते अन्तिमं पदं च निष्पद्यते। निष्पन्नपदे प्रक्रियायाः ज्ञानं साररूपेण उपलभ्यते न तु विस्तरेण। तथाहि प्रत्ययानामपि विकृतमेव स्वरूपं प्रतिभाति। अन्तिमपदे विद्यमानैः विभिन्नैः चिह्नैः लिङ्गवचनादिधर्मज्ञानं, फलतः पदार्थज्ञानं च प्राप्यते। सन्दर्भोऽपि पदार्थनिश्चये उपकरोति। यथा- रामः इत्यत्र रम् धातुः। धातौ वृद्धिविकारः। अन्ते अः इति प्रत्ययांशः। तत्रापि घञ्-प्रत्ययस्य अकारः, सुपः विसर्गश्च। अस्मिन्नुदाहरणे वृद्ध्यक्षरं दृष्ट्वा, प्रत्यये ञित्त्वमुत णित्त्वम् अनुमातुं शक्यते (अचो ञ्णिति इति सूत्रस्मरणात्)।

ख) प्रत्ययावशेषान् दृष्ट्वा लिङ्गस्य अनुमानम्

लिङ्गादिव्यवस्था यद्यपि विवक्षाद्वारा क्रियते, तथापि तस्य परिणामः साक्षात् अन्तिमपदे दृश्यत एव। यथा- वृक्षः इत्यत्र प्रथमाविभक्तौ एकवचनरूपे विसर्गचिह्नेन पुंलिङ्गविवक्षा ज्ञायते। फलमित्यत्र अम् इति प्रत्ययांशेन नपुंसकलिङ्गत्वं ज्ञाप्यते अतोऽम् इति सूत्रबलात्। लिङ्गव्यवस्थापनार्थं पाणिनिना लिङ्गानुशासनम् उपदिष्टमस्ति। तत्रत्यैः सूत्रैः लिङ्गज्ञानं सामान्यतया प्राप्यते। परन्तु सम्पूर्णज्ञानार्थं

कोषाः प्रमाणम्। उदा- "षोपधः" इति सूत्रं पुंलिङ्गाधिकारे उपदिष्टम्। तेन वृषः वृक्षः इत्यादिशब्दाः पुंलिङ्गाः इति ज्ञायते। तदग्रिमं सूत्रमस्ति "शिरीषर्जीषाम्बरीषपीयूषपुरीषकिल्बिषकल्माषाणि नपुंसके"। इदं पूर्वतनसूत्रस्य अपवादभूतम्। अनेन पीयूषपदं नपुंसकलिङ्गमिति ज्ञायते। तथैव "क्तिन्नन्तः" इति सूत्रं स्त्र्यधिकारे पठितम्। तेन कृतिः गतिः इत्यादयः स्त्रीलिङ्गकाः इति ज्ञायते। एवं रीत्या "मिन्यतः" इत्यपि स्त्र्यधिकारे पठितम्। सूत्रार्थः- मिप्रत्ययान्तो निप्रत्ययान्तश्च धातुः स्त्रियां स्यात्। यथा भूमिः ग्लानिः। तदग्रे "वह्निवृष्णवग्नयः पुंसि" इति अपवादसूत्रमपि पठितम्। एवं प्रकारेण लिङ्गानुशासनस्य पठनेन लिङ्गज्ञानं सम्पादयितुं शक्यम्। कृत्सु तावत् स्पष्टं लिङ्गं दृश्यते। यथा ल्युट् प्रत्ययान्ताः शब्दाः नपुंसकलिङ्गकाः भवन्ति "ल्युट् च" इति सूत्रप्रामाण्यात्। यथा- पठनम्, जल्पनम्, धावनम्। क्रियासामान्ये द्योतितव्ये नपुंसकलिङ्गः शब्दः भवति क्तप्रत्यययोजनेन। यथा- हसितम्, जल्पितम्। अत्र "नपुंसके भावे क्तः" इति सूत्रं प्रमाणम्।

समासेषु लिङ्गव्यवस्था विस्तृता अस्ति। अव्ययीभावसमासश्चेत् सामान्यतया नपुंसकलिङ्गः शब्दः निष्पद्यते। द्वन्द्वश्चेत् उत्तरपदस्य लिङ्गं स्वीक्रियते। बहुव्रीहिश्चेत् द्योतितपदार्थमाश्रित्य लिङ्गव्यवस्था परिकल्प्यते। भिन्नार्थकपदेषु लिङ्गानुगुणम् अर्थनिर्णयः क्रियते। तत्र यद्यपि प्रत्ययः समानः लिङ्गविवक्षा तु भिन्ना। अथ च, एकं पदं दृष्ट्वा अनेके अंशाः अनुमातुं शक्याः। तेषां ज्ञानेन अज्ञातपदानां अवगमने सारल्यं भवति। यद्यत्र पुंलिङ्गविवक्षा नाभविष्यत् तर्हि रामम् इत्यपि प्रथमायां रूपम् असेत्स्यत्। तमालपत्रे रामशब्दः नपुंसकमिति विविधकोषदर्शनेन ज्ञायते। स्त्रीलिङ्गविवक्षायां रामा इत्यपि रूपम् सेत्स्यति। अतः लिङ्गज्ञाने भवितव्ये विवक्षा का इति ज्ञातव्या। आपः इत्येतस्मिन् पदे यद्यपि अः इति अन्ते श्रूयते तथापि अस्य स्त्रीलिङ्गं बहुवचनं च। अनेन उदाहरणेन ज्ञायते यदेकस्य चिह्नस्य बहवो विकल्पाः भवन्ति। अस्मिन् सन्दर्भे केवलं सिद्धपदस्थचिह्नं दृष्ट्वा लिङ्गमनुमातुम् अशक्यम्। लिङ्गानुशासनं कोशाः वा शरणम्।

भारतीयपरम्परायां सरस्वत्याः विशिष्टं स्थानम्। वैदिकवाङ्मये सरस्वत्याः मुख्यतः अस्माभि: नदी वाग्देवता चेत्यनयोः रूपेण वर्णनं प्राप्यते। वस्तुतः सरस्वती वैदिकवाङ्मये एका नदी देवी (ऋ 6.49.7), अपरा नदीभिः सह एकं नाम (ऋ. 10.75.5), अन्यया देव्या (ऋ. 1.30.8.) इडया भारत्या च सह अपि (ऋ. 2.3.8) प्रयुज्यते। यजुर्वेदे सरस्वत्याः नाम विभिन्नेष्वर्थेषु प्रयुज्यते यथा- सरसः प्रशंसिता ज्ञानादयो गुणा विद्यन्ते यस्यां सा सर्वविद्या प्रापिका वाक्, विज्ञानवती स्त्री (यजु. 21.49) प्रशस्तं सरो विज्ञानं विद्यते यस्याः सा (विदुषी स्त्री) (यजु. 19.83), प्रशस्तज्ञानयुक्ता पत्नी (यजु. 19.82) योगिनी स्त्री (यजु. 19.93), विदुषी शिक्षिता माता (यजु. 20.64), शास्त्रविज्ञानयुक्ता वाक् (यजु. 20.55), विद्या सुशिक्षिता वागिव पत्नी (यजु. 10.34), विज्ञाननिमित्ता स्त्री (यजु. 21.51) प्रशस्तबोधः शिक्षायुक्ता वाणी (यजु. 18.16), प्रशंसिता गृहिणी तथा पुरुषः (20.59), सुसंस्कृता वाक् (यजु. 20.84) इत्येभिः स्पष्टं भवति यत् वेदेषु सरस्वती सर्वत्र सुशिक्षित वाक्, विद्यायाः अधिष्ठात्री अथ च नदीरूपेण प्रयुक्ता।

इमं मे गंगे यमुने सरस्वती शुतुद्रि स्तोमं सचता परुष्ण्या।
असिक्न्या मरुद्वृधे वितस्तयार्जीकीये श्रृणुह्या सुषोमया।। ऋग्वेद:- 10.75.5

अस्याः ऋचः आधारेण नाना पावगी अलिखत् यद् इन्द्रः वृत्रं वज्रेण हत्वा सप्तसिन्धून् मुक्तीकृतवान्। अथर्ववेदे 'यो हित्वाहिमरिणात् सप्त सिन्धून्' (अथर्ववेद- 20.34.3) तथा अहन्नहिमरिणात् सप्त सिन्धून् (अथर्ववेद- 20.91.12) इत्यनेन आधारेण इन्द्रः वृत्रं हत्वा सप्तनदीः मोचितवान्। सप्त सिन्धून् पदस्य व्याख्यायां सायणस्तु 'गङ्गाद्यानद्यः अर्थः कृतः। अत्र मन्त्रे तु नदीनाम् उल्लेखः विद्यते। सप्त नद्यः काः मन्येरन्निति विवादितविषयः। सम्पूर्णानन्दे गंगा, यमुना, मरुद्वृधा इत्येताः विहाय सप्तनदीनां विषये तावत् कथ्यते। वस्तुतः सप्तसिन्धुप्रदेशः नैव निश्चितः। सायणस्तु नदीपरकम् अर्थं प्रत्यपादयत् किन्तु अनन्तरं सेनापरकः अर्थः - गंगेति लक्ष्यं प्रति

गच्छन्ती, यमुना - नियमानां व्यवस्थायाश्च रक्षित्री, सरस्वती - जल इत्यादीनाम् आवश्यकसामग्रीणां प्रापयित्री, शुतुद्री - सामग्रीसंभरणार्थं तीव्रयानैः सुसज्जितानां यन्त्रोपकरणानां सेना इत्येतान् अर्थान् प्रतिपादितवान्।

अस्यैव मन्त्रस्य अध्यात्मपरकोऽर्थः - गंगे यमुने- हे इडे हे पिगंले, शुतुद्रि परुष्णि सरस्वती - हे शुतुद्री तथा परुष्णी नामाभिधेया सुषुम्ना नाडी, मे इमं स्तोमम् आसचत - त्वं मदीयं परमेश्वर स्तवनं सेवस्व! मरुद्वृधे अस्तिक्या-हे सुषुम्ने त्वं पिगंलया सह, आर्जीकीये वितस्तया सुषोमया- हे इडे त्वं वितस्ता नामाधेया सुषुम्नया सह मिलिता, आणुहि - मदीयं परमेश्वर स्तवनं श्रृणोहि। शिवस्वरोदये उक्तमंत्रस्य अध्यात्मपरकः अर्थः अनेन प्रकारेण वर्णितः लभ्यते-

नाभिस्थानगकन्दोर्ध्वमंकुरादेव निर्गता द्विसप्ततिः, सहस्राणि देहमध्ये व्यवस्थिताः ॥ ३२ ॥

तासां मध्ये दश श्रेष्ठा दशानां तिस्र उत्तमाः। इडा च पिंगला चैव सषुम्णा च तृतीयका ॥ ३६ ॥

गान्धारी हस्ति जिह्वा च पूजा चैव यशस्विनी। अलम्बुषा कुहुश्चैव शंखिनी दशमी तथा ॥ ३७ ॥

इडा पिंगला सुषुम्णा प्राणमार्गे व्यवस्थिता ॥ ४१ ॥

नाभिस्थानगतकन्दात् उपरि अंकुरः इव ७२००० संख्याकाः नाड्यः याः समग्रे शरीरे व्यवस्थिताः। तासु दश सर्वोच्चाः अथ च तासु दशस्वपि इडा, पिंगला, सुषुम्णा इत्येताः तिस्रः उत्कृष्टाः । शेषाः सप्त- गान्धारी, हस्तिजिह्वा, पूजा, यशस्विनी, अलम्बुष, कुहू, शंखिनी च। उक्तग्रन्थे -

इडा गंगेति विज्ञेया पिगंला यमुना नदी।
मध्ये सरस्वती विद्यात्प्रयागादि समस्तथा॥

एतन्नाम - इडा-गंगा, पिंगला - यमुना अथ च द्वयोर्मध्ये संगमस्थलमेव प्रयागः। यदि वेदस्य शब्दाः यौगिकाः मन्यन्ते तर्हि ते जनस्य स्थानविशेषस्य च संकेतः नदीपरकः तस्यां दशायां अस्यार्थः- गंगा - उत्तमा गतिं गच्छन्ति अनया इति गंगा- अस्यां नाड्यां प्राणान् वशीकृत्य योगी उत्तमगतिं प्राप्नुवन्ति। यमुना- पूरकप्राणायामेन प्राणान् आत्मनि सम्मेलयन्ती शरीरे गतिं कुरुते । अनेन नाडीगतेन

अभ्यासेन योगी चित्तस्थिरतां प्राप्नुवन्ति। सरस्वती-सरसजलवती गच्छति वहति वा - प्रशास्तरसवती सुषुम्णानाडी सरस्वती कथ्यते। वेदेष्वपि अनेकेषु मन्त्रेषु सरस्वती प्रशास्तरसवती मता ।

ऋग्वेदे सरस्वती अनेकस्थलेषु उल्लिखिता। क्वचित् देवीरूपेण, नदी , क्वचिच्च विश्वरूपेति। सप्तममण्डलीये ९५ तमे अथ च ९६ तमे सूक्ते विशिष्टरूपेण एतत् स्वरूपं प्रकाशितम् ।

एषा ऋग्वेदीया एका प्रमुखा नदी । या आधिक्येन वेगवती शक्तिशालिनी च मता- एषा सरस्वती नदी सर्वाधारम् उदकम् आधृत्य वहति। तस्याः अस्माभिः संरक्षणं प्राप्यते । वेगवत्प्रवाहयुक्ता सरस्वती अन्याः सर्वाः नदीः पृष्ठे कृत्वा अग्रे वर्धते काचित् वेगवति रथे समारूढा देवता इव।[1] एषा नदी स्वीयबलशालिभिर्लहरीभिः शिखराणि मृणालमिव त्रोटयति।[2] एषा स्वीयैः शब्दैः पृथ्वीम् आकाशं च पूरयति।[3] एषा च नदीषु सर्वश्रेष्ठा उच्यते- अम्बितमे नदीतमे देवीतमे सरस्वती।[4]
वाजसनेयीसंहितायां मरुतां पत्नी कथिता- सरस्वती योन्यां गर्भमन्तरश्विभ्यां पत्नी सुकृतं विभर्ति।[5] सरस्वती वाक्, अन्नं सोमश्चापि कथ्यते-
वाग् वै सरस्वत्यन्नं सोमस्तमाद्यो वाचा प्रसाभ्यन्नादो इव भवति।[6]
वाजसनेयीसंहितायां सरस्वत्यां पञ्चनदीनां सम्मेलनम् अथ च स्वयं सरस्वत्याः पञ्चशाखानां च उल्लेखः प्राप्यते-

पञ्च नद्यः सरस्वतीमपियन्ति सस्रोतसः। सरस्वती तु पञ्चधा सो
देशेऽभवत्सरित्।।[7]

ताण्ड्यब्राह्मणे सरस्वती पश्चिमदिशम् अभिमुखम् उह्यमान-नदीरूपेण उल्लिखिता- प्रत्यङ्मुखी खलु सरस्वती प्रवहति।[8] ऋग्वेदे अस्याः नद्याः पर्वतान्निसृत्य समुद्रे पततीति विवेचनं प्राप्यते-

"एका चेत्सरस्वती नदीनां शुचिर्यति गिरिभ्य आ समुद्रात्।[9]

नद्येषा सिरमौरस्य पर्वतेभ्यः निसृत्य अलबद्रीनामके स्थाने प्रकटिता। चालौरनामके स्थाने लुप्ता। पुनः भवानीपुरे प्रकटिता सती बालछप्परनामके स्थाने लुप्ता। पुनः बडाखेडानामके स्थाने प्रकटीभूय पेहोवायाः समीपे उरनीनामके स्थाने मारकण्डायां मिलिता। अथ च घग्घरनामिकायां नद्यां सम्मिलिता। महाभारते सरस्वती यत्र लुप्ता

तत् स्थानं विनशन इति कथ्यते।[10] निषादान् प्रति द्वेषकारणेन सरस्वती अत्र पृथ्व्यां प्रविष्टा।[11] ताण्ड्यमहाब्राह्मणे सरस्वतीविनशने यज्ञः सम्पन्नः इत्यपि उल्लेखो विद्यते।[12]

कुरुक्षेत्रे उह्यमाना सरस्वती नदी प्रतीची प्राची इत्युभयविधनाम्ना स्मर्यते । कुरुक्षेत्रम् आप्लावयनात् परम् एषा नदी पश्चिमाभिमुखी जाता।[13] वामनपुराणस्य भागवतमहापुराणस्य च अनुसारं पृथूदकस्य (पेहोवा) समीपं सरस्वती नदी पूर्वाभिमुखा अभूत्। प्रतिहारराज्यस्य भोजप्रथमस्य पेहोवास्थेन शिलालेखेन ज्ञायते यत् नदी पेहोवातः या वहति सा प्राची सरस्वती। महाभारते पुराणेषु च सरस्वत्याः विभिन्नप्रकारेण स्तुति: कृता वर्तते। अस्य तटे वासः अत्यन्तम् आनन्दायकः। सरस्वतीं सेवित्वा स्वर्गंगताः मानवाः सदा सरस्वतीं स्मरिष्यन्ति।[14]

सरस्वती सर्वासु नदीषु पुण्यशालिनी । सरस्वतीं सेवित्वा जनः इहलोके परलोके च कुकृत्यानि प्रति नैव शोचन्ति।[15] वामनपुराणे सरस्वती विष्णुजिह्वा कथिता।[16] स्कन्दपुराणे ब्रह्मपुत्री बोधिता। सर्वप्रथमं सरस्वती मानवीरूपेण वामनपुराणे उल्लिखिता-

हंस कुन्देन्दु संकाशं बालव्यजनमुत्तमम्।
सरस्वती सरिच्छ्रेष्ठा गजारूढा समादधे।। वामनपुराण-२७.१२

महाभारते पुराणेषु च सरस्वत्याः उद्गमस्रोतः प्लक्षवृक्षः उदीरितम्।[17] प्लक्षवृक्षमूले स्थित्वा मार्कण्डेयेन ऋषिणा कुरुक्षेत्रे सरस्वतीम् आनेतुं स्तुतिर्विहिता तदा एषा कुरुक्षेत्रे प्रविष्टा।[18]

सरस्वत्याः रूपद्वयं वैदिकसरस्वती अनन्तरकालीना सरस्वती च। मैक्समूलरः द्वयमपि मनुते। एषा पञ्चनदस्य पश्चिमीसीमानं विनिर्माति। विभिन्नमतेषु दृष्टिपातेन एषा कुरुक्षेत्रे एव वहतीति सिद्ध्यति।

यजुर्वेदय एकस्मिन् मन्त्रे पञ्चनदीनाम् उल्लेखः प्राप्यते। अस्य आधारेण विद्वान् वेदे पंजाब एतन्नाम प्रदेशविशेषस्य वर्णनं मनुते।

पञ्चनद्यः सरस्वतीमपियन्ति सस्त्रोतसः।
सरस्वती तु पञ्चधा सो देशोऽभवत्सरित्। यजुर्वेद:-३४.११

एतन्नाम पञ्च नद्य: स्वीयस्त्रोतोभ्यः सरस्वतीं प्रति यान्ति। सा सरस्वती पञ्चभिः

प्रकारैः तस्मिन् देशे वहति।

एतत् सर्वविदितं यत् सरस्वतीनाम्ना नदी पंजाबे न वहति नैव च पञ्च नद्यः सरस्वत्यां पतन्ति। सरस्वती पञ्चसु धारास्वपि नैव वहति । विद्वद्भिः मन्त्रेषु आगतानि नामानि प्रातिपदिकानि मत्वा यौगिकप्रक्रियानुसारं मंत्रार्थेन ज्ञापितं यत् तस्यां पञ्चभिः ज्ञानेन्द्रियैः प्राप्तं ज्ञानम् अथवा मनसः पञ्चवृत्तीनां स्मृतौ स्थित्वा वाण्या अनेकाभिः विधाभिः अभिव्यक्तिः उल्लिखिता।[19]

सरस्वत्याः उपर्युक्तविवेचनस्य समीक्षा डॉ. राजबली पाण्डेयः अनेन प्रकारेण विहिता यत्- 'सर्वप्रथमम् ऋग्वेदे सरस्वती पवित्र नदी क्रमशः नदी देवता, वाग्देवता इत्येतैः रूपैः वर्णिता। सरस्वती मूलतः शुतुद्री (सतलज) इत्यस्याः एका सहायकनदी। यदा शुतुद्री स्वमार्गं परिवर्त्य विपाशायां (व्यास) मिलिता सरस्वती तस्याः पुरातनपरिवृते उह्यमाना आसीत्। एषा राजस्थानस्य समुद्रे सम्मिलति स्म। महती वेगवती नदी इत्यनेन रूपेण अस्याः वर्णनं प्राप्यते। यस्याः तटे राजानः वसन्ति, यजन्ति मंत्रान् च गायन्ति स्म। सरस्वती अद्यत्वे घग्घर इतिनाम्ना व्यवह्रियते । सरस्वतीदृषद्वत्योर्मध्यवर्ती प्रदेशः ब्रह्मावर्तः । यश्च वैदिकज्ञानाय कर्मकाण्डाय प्रसिद्धः। सरस्वती देवीरूपेण ऋग्वेदे कल्पिता या पवित्रतां, शुद्धिं, समृद्धिं, शक्तिं च प्रददाति। अस्याः सम्बद्धता अन्याभिर्देवताभिः, इन्द्रेण मरुद्भिः सह बोधिता। बहुषु सूक्तेषु सरस्वत्याः सम्बद्धता यज्ञीयदेवताभिः इडा, भारती इत्येताभिः सह युक्ता। पूर्वं भारती सरस्वतीतः अभिन्ना मता।

पूर्वं तु सरस्वती नदी, देवता परन्तु ब्राह्मणकाले[20] तस्याः वाक् (वाग्देवता) इत्यस्मात् अभेदः मतः। परवर्तिनि काले तु सा विद्यायाः कलायाश्च अधिष्ठात्री देवी अभूत्। पुराणेष्वपि सा ब्रह्मपुत्री मता।[21]

निष्कर्षः- कथयितुं शक्यं यत् सरस्वत्याः इतिहासोऽत्यन्तं रहस्यमयः। अद्यापि अनेके विद्वांसः, पुरातत्त्वविभागश्च तद्रहस्योद्घाटने लग्नाः। यस्यां नद्याम् अपारजलराशिः आसीत् सा महावेगवती सहसा कथं लुप्ता। यस्याः तटे सततं साधना, यज्ञः तपस्या च भवति स्म, सा अद्य अनुसन्धातुं विषयत्वेन समुपस्थिता। वेदेषु, ब्राह्मणग्रन्थेषु, पुराणेषु, महाभारते, रामायणे, लौकिके संस्कृतसाहित्ये अन्यविधासु च यस्याः विस्तृतं सारगर्भितं विवेचनं प्राप्यते। सा सरस्वती अद्यापि

गवेषणायाः जिज्ञासायाश्च विषयत्वेन जाता।

सन्दर्भाः-

1- प्रक्षोदसा धायसा सस्र एषा सरस्वती धरुणमायसी पूः
प्रबावधाना रथ्येव याति विश्वा अपो महिना सिन्धुरन्या। ऋग्वेदः-७.९५.१

2- इयं शुष्पेभिर्बिसखा इवारुजत्सानु गिरीणां तविषेभिरुर्मिभिः॥ ऋग्वेदः-६.६.१२

3- आपप्रुषी पार्थिवान्युरु रजो अन्तरिक्षम् सरस्वती निदस्पातु॥ ऋग्वेदः-६.६.११

4- अम्बितमे नदीतमे देवीतमे सरस्वती। ऋग्वेदः-२.४१.१६

5- सरस्वती योन्यां गर्भमन्तरश्विभ्यां पत्नी सुकृतं बिभर्ति। वा सं. १९.९४

6- वाग्वैसरस्वत्यन्नं सोमस्तमाद्यी वाचा प्रसाभ्यन्नादी हेव भवति। वा. सं.-१९.१२ शतपथ ब्राह्मण-३.९.११९.

7- वा० सं. ३४.११

8- ता० ब्रा० २५.१२.१९

9- ऋग्वेद ७.९५.२

10- ततो विनशनं गच्छेन्नियतो नियताशनः। गच्छत्यन्तर्हिता यत्र मेरूपष्ठे सरस्वती।। वनपर्व-८१.११८

11- द्वारं निषाद राज्ट्रस्य येषां द्वेषात्सरस्वती। प्रविष्टा पृथिवीं वीर मा निषादा हि मां विदुः।। वनपर्व-१३०.४

12- सरस्वत्या विनशने दीक्षन्ते। ताo ब्रा० २५.१०.१

13- कुरुक्षेत्र समाप्लाव्य प्रयाता पश्चिमां दिशाम्॥ वामन सरो० १२.१.२

14- सरस्वतीवास समा कुतो रतिः सरस्वती वास समा कुतो गुणाः।
सरस्वतीं प्राप्य दिवं गता जनाः सदा स्मरिष्यन्ति नदीं सरस्वतीम्।। शल्य०-५४.३८

15- सरस्वती सर्वदीषु पुण्या सरस्वती लोकशुभापरा सदा।
सरस्वतीं प्राप्य जनाः सुदुष्कृतं सदा न शोचन्ति परत्र चेह च।। शल्य० - ५४.३९

16- एवं स्तुता तदा देवी विष्णोर्जिह्वा सरस्वती।।वामन० ३२.३३

17- प्लक्षादेवी सुता राजन् महापुण्या सरस्वती। वनपर्व-८१.७

18- (क)तस्मिन् प्लक्षे स्थितां दृष्ट्वा मार्कण्डेयो महामुनिः।
प्रणिपत्य तदा मूर्ध्ना तुष्टावाथ सरस्वतीम्॥ वामन-३२.५
(ख) नदी प्रवाह संयुक्ता कुरुक्षेत्रं विवेश ह।। नारदीय पु. २.६४.१७-१८

19- वेदमीमांसा - आचार्यः लक्ष्मीदत्तदीक्षितः, दिल्ली १९८०
20- शतपथ ब्रा० ३.९.१ तथा ऐतरेयब्राह्मणः- ३.१
21- हिन्दू धर्मकोशः, डॉ० राजबलीपाण्डेयः, लखनऊ १९७८

❋ ❋ ❋

वैदिकवाङ्मयेषु कात्यायनश्रौतसूत्रस्योपादेयता

डॉ. अश्विनीशुक्ला

वेदस्यार्थः –

ज्ञानार्थक-विद्-धातोः निष्पन्नो वेदशब्दः तस्यार्थः ज्ञानम् एवास्ति । एतद् ज्ञानंसमस्तम् आध्यात्मिकं एवञ्च लौकिकं ज्ञानस्य स्रोतं ईश्वरीयं ज्ञानं वक्तुं शक्यते । प्राचीनं ऋषीणां प्रतिभायाः प्राप्त सत्यं ज्ञानम् एवं वेदः परमं प्रमाणम् आगम: शब्दप्रमाणेषु उत्कृष्टो वर्तते । अतः वेदेषु सर्वं ज्ञानं तत्रैव लभ्यते । एतेषां ज्ञान विश्वेऽस्मिन् अत्रैव द्रष्टुं शक्यते ।

प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।
एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता ।।[1]

सायणाचार्यः तैत्तिरीय-संहितायां भाष्यभूमिकायां यत् लिखितं (इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः) विद्यते ज्ञायतेऽनेनेति वेदः इत्यर्थः येन विधिना यत् ज्ञानं प्राप्यते सः वेदः इत्युच्यते ।

वेदस्य स्वरूपम् –

प्राचीन-परम्परायाः वेदस्य, अन्तर्गतं मंत्र एवं ब्राह्मणं, द्वौ भागौ निहितौ वर्तते । (मन्त्रब्राह्मणयोर्वेदनामधेयम्) यस्य उच्चारणं कृत्वा यज्ञ-यागादिषु अनुष्ठानं क्रियते एवं यज्ञेषु देवानाम् आवाहनं स्तुतिः क्रियते तदेव मन्त्रः उच्यते। कर्मणातन्मन्त्राणां व्याख्यानग्रन्थः ब्राह्मणाम् इत्युच्यते । वैदिकवाङ्मयं चतुर्धा विभज्यते । वेदस्य षडङ्गेषु महत्त्वम् वर्तते ।सम्पूर्णवैदिकसाहित्यस्य विकासः वेदानां रक्षार्थम् अभवत्। वेदाङ्गशब्दः उपकारक इत्यर्थः। चतुर्षु वेदेषु एव वेदाङ्गं गणना प्रसङ्गेषु अपरा विद्या कथयते। तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षाकल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति एतेषु षडङ्गेषु वेदस्यार्थ त्रीणि प्रमुखानि उद्देश्यानि वर्तन्ते । बोधः (व्याकरणम् एवं निरूक्तं) वर्तते । तथैव वेदेषु याज्ञिकप्रयोगः (कल्प एवं ज्योतिषं) शास्त्रं वर्तते ।

पाणिनीयशिक्षायाः वेदाङ्गानं विषयेषु वेद्पुरुषस्य विविध-अवयवानां श्लोकः प्रतिपादितम्–

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते।।[2]

शिक्षा, कल्प, व्याकरणं, निरुक्तं, छन्दः ज्योतिषम्।

कल्पेषु विभिन्नं वैदिकशाखानां ब्राह्मणग्रन्थानां विहित कर्म एव व्यवस्थितं वर्णनं कल्पवेदाङ्गेषु वर्तते

कल्पो वेदविहितानां कर्मणानुपूर्व्येण कल्पना शास्त्रम्। कल्पशास्त्रं चतुर्धा विभज्यते। श्रौतसूत्रं, गृह्यसूत्रं धर्मसूत्रं शुल्वसूत्रं चेति।

श्रौतसूत्रेषु वैदिक ब्राह्मणानां वर्णितं यज्ञ-यागादि विवरण प्राप्यते । वैदिकयागस्य प्रतिपादितं याग: श्रौतयागः: कथयते । तदा सः सप्तहविर्यागः सप्त सोमयागादि प्राप्यते। शुक्लयजुर्वेदस्य श्रौतसूत्रं शुल्बसूत्रञ्च महर्षिणा कात्यायेन प्रणीतम् एवं कात्यान: याज्ञवल्क्यस्य पुत्रः याज्ञवल्क्यस्य द्वितीयायां पत्न्यां कात्यायन्यां जनिं लेभे। तेन च वाजसनेयशाखिनां श्रौताग्निकर्मसाधनपद्धतिदर्शकानि सूत्राणि कल्पसूत्रम् । शुल्वसूत्रेषु यज्ञवेदिका निर्माणस्य विधिनां वर्णितमस्ति । अल्पाक्षरत्वे बहर्थबोधकत्वं सूत्रत्वं इत्युक्तं वर्तते।

हविर्यागेषु घृत पायस दधि पुरोडाशादि आहुति प्रदीयते । तदरीत्या अग्न्याधान अग्निहोत्रं, दर्शपूर्णमासं, आग्रहायणं, चातुर्मास्यं निरूढपशुबन्धं एवं सौत्रमणी यागस्य विवेचनं वर्तन्ते। सोमयागस्य प्रभेद: अग्निष्टोमः अत्यग्निष्टोमः, उक्थ्यः पोडशी; वाजपेय: अतिरात्रः एवं 'आप्तोर्याम एतेषु यागेषु श्रौतयागस्य यत् सर्वमपि विधिः कर्मः सूत्ररूपेण महर्षिकात्यायनेन कात्यायनश्रौतसूत्रम् इत्यस्मिन्ग्रन्थं कर्मकाण्डविधि: सम्यक् रूपेण प्रतिपादितम् वर्तते। तदा तेषां ग्रन्थानां अन्येषु भाषायां सरली कृतः वर्तते।

कात्यायन-श्रौतसूत्रं परिभाषा निरूपणं प्रसङ्गे सति कस्य यज्ञं कर्तुं अधिकारः सन्ति तेषां निर्णयः, श्रौतसूत्रेषु प्रदत्तं वर्तते यतोहि - (अथातोऽधिकारः[3]) अथ

वेदाध्ययनम् अतः वेदाध्याध्यायनस्य कर्तव्यव्यापारः फलभोक्तृत्व समानाधिकरणव्याख्यास्ते इतिशेषः वेदाध्ययन वृत्ते तदनंतरं तादृशवेदवेद प्रतिपादितेषु कर्मसुः अधिकार: अनुष्ठानरूपो व्यापारः - फलयुक्तानि कर्माणि:[4] सर्वाण्यपि कर्माणि वेदोक्तानि फलजनकान्ये वेत्यर्थ: । एवं च स्वर्गकामादिपदं पुरुष विशेषणं सदपि विशेषणी भूतस्वर्गादि बोधकमर्थाद भवति। अन्यथा फले कर्मणि पुरुषस्य प्रवृत्यनुदयाद वेदवाक्य प्रवर्त्तकत्वमेव भज्येत। अतश्च यत्रापि फलं न श्रूयते तत्रापि फलं कल्पनीयमेवेति भावः।

बहुप्रकाराणि कर्माणि सन्ति, एतेषु भिन्नताऽपि दृश्यते। तेन स्मार्ताग्निकर्म पद्धतिनिदर्शकानि सूत्राण्युपनिबद्धानि तदनुरोधेनैवेदानीं वाजसनेयिनां गर्भाधानादि षोडशसंस्कारकर्माणि प्रवर्तन्ते। आदित्य सम्प्रदायान्तर्गतो यजुर्वेदः शुक्लयजुर्वेद ब्रह्मसम्प्रदायान्तर्भूतश्च कृष्ण यजुर्वेदोऽस्ति । शुक्लयजुर्वेदस्य पञ्चदशशाखा: भवन्ति । श्रौतयज्ञीयकुण्डमण्डपेष्टकादीनां निर्माणार्थ एकमेव कात्यायनश्रौतसूत्रम् वर्तते । प्राकृतानां विकृतानां च यज्ञानां स्वरूपनिर्धारण श्रौतसूत्राणामेव वोद्देश्यम। तेषु अग्निहोत्रादि यज्ञानां विधिः दृश्यते। यागानां नियमानियज्ञीयपदार्थाना शुद्धता, हवनसामग्रीनां संग्रह: दक्षिणादाननियमानां ज्ञानं श्रौतसूत्रैरेव भवति ।

श्रौतसूत्राणामध्ययनस्याभावे यागविधिं व्यवस्थितरूपेण ज्ञातुं समर्था न जायते। दानम-वाचनक्रिया अन्वारभण वर-वरण-स्पर्श-दक्षिणां पयोव्रतादेर्ज्ञानम यागीय-वस्तूनां बोधः श्रौतसूत्रैरेव भवति। तत्र श्रुतौ तावत् वैदिककर्माणि पञ्चर्धे विभक्तानि । स एष यज्ञः पञ्चविधिः अग्निहोत्रम्, दर्शपूर्णमामः, चातुर्मास्यानि पशुः, सोम: इति । अतः यजुर्वेदस्य शाखा: कात्यायनश्रौतसूत्रम् -षड्विंशत्यध्यायेषु विभक्तं वर्तते। श्रौतसूत्राणामावश्यकता। परन्तु कालवशात् बुद्धिक्षमतायां ह्रासे संजात: एक साम्प्रतिके झञ्झामये वातावरणे निखिलं जगत् विविधै रूपदेवैरुत्पातैः आस्तिक: वैदिककर्मकाण्डपद्धत्या यथाविधि देवान् उपासते तथा च देवताद्देशेन पञ्चामृतं फलं दुग्धं दधिमध्वादीनि बहुमूल्यानि वस्तूनि समर्प्य धनमायुः पुत्रं गृहं स्वरक्षां विश्वकल्याणं च याचन्ते श्रौतस्मार्तयागानां चानुष्ठानं कुर्वन्ति ।

द्रव्यं देवता त्यागः[5]

फल-पुष्पदधि - ब्रीहियवादिपदार्थानां इन्द्रादिदेवातानां कृते त्याग: समर्पण

वा यज्ञः यज्ञै: प्राणिनां निरन्तरमुन्नतिः प्रदीयते स्मः । यजदेवपूजा संगतिकरण दानेषु यजधातो यज्ञ शब्दं निष्पपद्यते । यत्र कर्मकाण्डइन्द्रादि देवतानां पूजनं क्रियते तदा देवैः सह जनानां मित्रता भवति जना: देवेभ्यः किमपि ददति। एतादृशं कर्मकाण्ड यज्ञशब्देन उच्यते। अत एव यज्ञाना व्याख्यानमेव श्रौतसूत्राणामुद्देश्यम्। यज्ञविषयकज्ञानं तु संजातम् । शास्त्रेषु कर्मणां विधानं त्रैविध्यं दृश्यते। होम: इष्टि: भागश्च एतेषु काश्चनप्रकृतयः काश्चनविकृतयश्च काश्चन उभयात्मकाः प्रकृतिकर्मसु सर्वेषामङ्गानां विधानमस्ति । प्राकृतानां विकृतानां च यज्ञानां स्वरूपनिर्धारणं श्रौतसूत्राणामेवोद्देश्यम् । अतः भगवतः महर्षिः कात्यायनप्रणीतं कात्यायनश्रौतसूत्रस्योपादयेता वर्तते। एनं विनैव यत् किमपि यज्ञं कर्तुं नैव शक्यन्ते। यज्ञेन मानावानां कल्याणं निहितमस्ति । अतः अस्य ग्रन्थस्योपादयेता अस्त्येव इति।

भारतीयसंस्कृतौ मानवजीवनस्य सम्पूर्णतां सार्थकतां च साधयितुं चतुर्वर्गस्य प्रवर्तनभूत्। चतुर्वर्गे धर्म: अर्थ: काम: मोक्षश्चेति चतुर्विधाः पुरुषर्थाः भवन्ति। मानवजीवने षोडशसंस्काराणां श्रौतसूत्रे विद्यमानाः वर्तन्ते ।

अत्र ये षोडश संस्काराः परिचाययन्ते, ते सन्ति- गर्भाधानम्, पुंसवनम्, सीमन्तोत्रयनम्, जातकर्म, नामकरणम्, निष्क्रमणम्, अन्नप्राशनम्, चूडाकर्म, कर्णवेधः, विद्यारम्भः, उपनयनम्, वेदारम्भः, केशान्तः, समावर्तनम्, विवाहः, अन्त्येष्टिः चेति।

गर्भाधानसंस्कारः

शिशोर्जन्मनः प्राक् तन्निमित्तको यः संस्कारः, स एव गर्भाधानसंस्कारः। अथवा शिशोर्मातुर्गर्भे बीजरूपेण प्रतिष्ठापनं गर्भाधानमुच्यते। दम्पती सोपवासं यज्ञादिकर्मणा मनः पवित्रीकृत्य परस्परमनुरागेण देवस्तवनपूर्वकं सन्तानोत्पत्तौ प्रवर्तते। वैदिककाले अस्मिन्नवसरे विष्णु-त्वष्ट्र-प्रजापति-सरस्वतीनां स्तवनं क्रियते स्म। बृहदारण्यकोपनिषदि विशिष्टान् पुत्रान् प्राप्तुं विशिष्टभोजनानां विधानं वर्तते। गर्भाधानसंस्कारे कालस्य शुभाशुभत्वमपि विचारणीयं भवति।

ऋतुकाले एव स्त्री गर्भधारणयोग्या भवति। रजोदर्शनात् षोडशरात्रयः स्त्रीणां ऋतुकाल उच्यते। तत्रारम्भिकं रात्रिचतुष्टयं सम्भोगाय निषिद्धम्। तदनन्तरं शुभतिथिनक्षत्रेषु गर्भाधानं समर्थ्यते। समदिनेषु पुत्रोत्पत्तिः विषमदिनेषु च

कन्योत्पत्तिः भवति। तदुक्तं मनुस्मृतौ-

युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु।
तस्माद् युग्मासु पुत्रार्थी संविशेदार्तवे स्त्रियाम्॥[6]

संस्काराणां व्याप्तिः न केवलं सम्पूर्ण जीवने अपितु जीवनस्य पूर्वापरभागेऽपि दृश्यते। यथा मरणादनन्तरं मृतस्यान्त्येष्टिसंस्कारो विधीयते, तथैव जन्मतः प्रागपि जनिष्यमाणस्य

गर्भाधानसंस्कारो भवति। संस्कारोऽयं यथा पुत्रस्य कल्याणाय तथैवात्मनः कल्याणाय अपि स्वीक्रियते। पुत्रोत्पत्त्या पिता पितृणां ऋणाद् मुक्तो भवति। तदुक्तं तैत्तिरीयसहितायाम्- "जायमानो वै ब्राह्मणस्त्रिभिऋणवान् जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः। एष वा अनृणी यः पुत्री यज्वा ब्रह्मचारी वा स्यादिति।"

पुंसवनसंस्कारः

पुंसः सवनं पुंसवनमित्युच्यते। गर्भलक्षणे दृष्टे सति पुंसवनसंस्कारस्य विधानं धर्मशास्त्रेषु वर्णितम्। याज्ञवल्क्यानुसारेण गर्भाशये गर्भगतेरारम्भात् पूर्वमेव संस्कारोऽयं सम्पादनीयः। येन संस्कारेण गर्भस्थजीवः पुमान् क्रियते, सः पुंसवनसंस्कार इत्युच्यते। भारतीयसंस्कृतौ स्त्री अपि पुरुषत्वस्य प्रक्रियायामेव भवति। तेन संस्कारोऽयं स्त्रीजातकेऽपि तथैव फलवान् भवति यथा पुरुषजातके। तथापि पुत्रप्राप्तिकामनया संस्कारोऽयं स्वीक्रियते। पारस्करगृह्यसूत्रे बौधायनगृह्यसूत्रे चोक्तं यत् कस्मिंश्चित् पुंनक्षत्रे पुत्रेच्छया क्रियमाणोऽयं संस्कार इति।

संस्कारोऽयं क्रमेण द्वितीयः स्वीकृतः। अयं संस्कारो गर्भनिश्चयात् परं तृतीये मासे क्रियते। यदि तृतीये मासे गर्भस्थितेः सम्यक् ज्ञानं न स्यात्तर्हि चतुर्थे मासेऽपि संस्कारोऽयं सम्पादयितुं शक्यते। गर्भस्य संस्कारतया क्रियमाणं केचिदमुं संस्कारं प्रतिगर्भं कुर्वन्ति। गर्भिण्याः संस्कारं मन्यमानाश्चान्ये सकृदेव संस्कारममुं सम्पादयन्ति।

अस्मिन्नवसरे गर्भिण्याः अङ्के जलेन पूर्ण पात्रं निधाय गर्भरक्षायै पुत्रप्राप्तये च विष्णुप्रमुखाणां देवानां स्तुतिर्विहिता। आयुर्वेदानुसारेण वटशुंगस्य सुलक्ष्मणायाः सहदेव्याः वा रसो दुग्धेन सम्मिश्रय गर्भवत्याः दक्षिणनासिकायां पातनीयः। तेन गर्भस्य रक्षा पुंस्त्वप्राप्तिश्च भवति।

सीमन्तोन्नयनसंस्कारः

गर्भवत्याः नार्याः सीमन्तः उन्नीयते यस्मिन् कर्मणि तत् सीमन्तोत्रयनम्। अस्मिन् संस्कारे गर्भवत्याः केशपाशमलङ्कुर्वन् पतिः स्वयमेव सौमन्तमुन्नयति। उत्सवप्रायोऽयं संस्कारो गर्भरक्षाकरः प्रोक्तः। वैदिकयुगे सीमन्तोन्नयनावसरे वीणावादिनो वीणावादनपूर्वक सोमराजस्य स्तुतिमकुर्वन्। गर्भस्य रक्षायै संस्कारोऽयमिति -

पत्न्याः प्रथमजं गर्भमत्तुकामाः सुदुर्भगाः।
आयान्ति काश्चिद् राक्षस्यो रुधिराशनतत्पराः ।।
तासां निरसनार्थाय श्रियमावाहयेत्पतिः।
सीमन्तकरणी लक्ष्मीस्तामावहति मन्त्रतः ।।

गृह्यसूत्रेषु प्रतिपादितं यद् गर्भतश्चतुर्थे षष्ठे वा मासे संस्कारोऽयं सम्पादनीयः। स्मृतिषु अयं संस्कारः षष्ठे अष्टमे वापि मासे प्रोक्तः। गर्भसंस्कारः क्षेत्रसंस्कारो वायमिति मतभेदे केचिदाचार्याः सर्वेषु गर्भकालेषु केचिच्च प्रथमगर्भकाले एव संस्कारममुं निर्दिशन्ति। संस्कारेऽस्मिन् गर्भवत्याः दोहदपूर्तिरपि सङ्केतिता। अस्मिन्नवसरे गर्भिण्याः स्वास्थ्यसम्बन्धिनः केचन नियमाः अपि निर्दिष्टाः। यथा सन्ध्याकाले न शयीत, रात्रौ न जागृयात्, यात्राधिकं न कुर्यादित्यादि।

जातकर्मसंस्कारः

शिशोर्जन्मनः परं सद्यः एवायं जातकर्मसंस्कारः सम्पाद्यते। जाते शिशौ पिता नान्दीपाठश्श्राद्धादिकं सम्पाद्य नाभिच्छेदनात् प्रागेव मन्त्रोच्चारणपुरःसरं सुवर्णशलाकया मधुसर्पिषोः प्राशनं कारयेत्। तदुक्तं मनुस्मृतौ –

प्राङ्नाभिवर्धनात् पुंसो जातकर्म विधीयते।
मन्त्रवत् प्राशनं चास्य हिरण्यमधुसर्पिषाम्।।[7]

ततः पिता शिशुकर्णसमीपमागत्य वाग्वाग्वागिति वाक्शब्दं त्रिरुच्चारयति। बृहदारण्यके प्रथमं दक्षिणकर्णे वाक्शब्दोच्चारणं ततश्च दधिमधुघृतप्राशनं चेति क्रमभेदो दृश्यते "वाग्वागिति त्रिरथ दधिमधुघृतं संनीयानन्तर्हितेन जातरूपेण प्राशयति, भूस्ते दधामि भुवस्ते दधामि स्वस्ते दधामि भुभुर्वः स्वः सर्वं त्वयि दधामीति।"

पश्चात् पिता शिशुकस्य गृह्यं नाम कुर्याद् 'वेदोऽसि' इति। ततः नाभिच्छेदनं विधाय शिशुः स्नाप्यते। तदनन्तरं पिता सरस्वतीं स्तुवन् शिशुं मातुः स्तनपानाय प्रयच्छति। पुत्रजन्मनि तद्दिने क्वचिद् निरन्तरमग्निः प्रज्वाल्यते। द्वादशसु पात्रेषु सुपक्वः पुरोडाशो वैश्वानराय समर्पते। दुग्धाज्यहविषा होमश्च क्रियते। जातकर्म संस्कारस्य द्वितीयं नाम आयुष्यकरणमस्ति।

अयं संस्कारोऽत्यन्तं प्राचीनः महत्वपूर्णश्च। बृहदारण्यकोपनिषदि जातकर्मणः सविस्तरं वर्णनं लभ्यते। गृह्यसूत्रेषु च संस्कारस्यास्य व्यवस्थापनं दृश्यते। किन्तु तत्र विधिमन्त्रादीनां क्रमिकप्रयोगविषये मतैक्यं नास्ति। पुत्रजन्मोत्सवे पिता प्रायशो दानमकरोत्।

नामकरणसंस्कारः

नामकरणसंस्कारस्य कालविषये शास्त्रेषु बहुविधो विचारः कृतः। जन्मतो दशमदिनादारम्य द्वितीयवर्षस्य प्रथमदिवसं यावदस्य संस्कारस्य विधानं धर्मशास्त्रकारैः विहितम्। मनुः जन्मतो दशमे द्वादशे वा दिवसे नामकरणसंस्कारं निर्दिशति। यदि तद्दिने न स्यात्तर्हि यस्मिन् कस्मिन्नपि शुभमुहूर्ते संस्कारोऽयं सम्पादयितुं शक्यते। तदुक्तं मनुस्मृतौ-

नामधेयं दशम्यां तु द्वादश्यां वाऽस्य कारयेत्।
पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते ।।[8]

जातकर्मसंस्कारे 'वेदोऽसि' इति गुह्यं नाम पित्रा कृतम्। नामकरणसंस्कारे व्यावहारिकं नाम कुलदेवतानुसारेण जन्ममासानुसारेण राशिनक्षत्रानुसारेण लोकानुसारेण वा क्रियते। गृह्यसूत्राणां जटिलनियमान् परित्यत्य मनुः नामकरणस्य सरलनियमं प्रतिपादितवान्। तद्यथा-

माङ्गल्यं ब्राह्मणस्य स्यात् क्षत्रियस्य बलान्वितम्।
वैश्यस्य धनसंयुक्तं शूद्रस्य तु जुगुप्सितम् ।।
शर्मवद् बाह्मणस्य स्यात् राज्ञो रक्षासमन्वितम्।
वैश्यस्य पुष्टिसंयुक्तं शूद्रस्य प्रेष्यसंयुतम्।।
स्त्रीणां सुखोद्यमक्रूरं विस्पष्टार्थं मनोहरम्।
मङ्गल्यं दीर्घवर्णान्तमाशीर्वादाभिधानवत्।।[9]

गृह्यसूत्रेषु चतुरक्षरं द्व्यक्षरं वा घोषवदाद्यन्तस्थं पुंसाम्, ईकारान्तमयुजाक्षरं च स्त्रीणां नाम प्रशस्तं भवति। द्व्यक्षरनामनि लौकिकैश्वर्यस्य चतुरक्षरनामनि चाध्यात्मिकाभ्युदयस्य कामना भवति। बौधायनानुसारेण पुरुषाणां नामानि ऋषिदेवपूर्वजानां नामान्याश्रित्य भवेयुः। तत्र साक्षादेव देवानां नामानि न ग्रहीतव्यानि। विष्णुपुराणानुसारेण वैश्यशूद्रयोः नाम गुप्त-दासात्मकं युज्यते। शर्म-वर्मात्मकं नाम ब्राह्मणक्षत्रिययोः श्रूयते। बृहदारण्यके मृत्योः पश्चादपि नाम्नो महत्त्वमुदीरितम्।

निष्क्रमणसंस्कारः

शिशोः जन्मनः परं प्रथमतया गृहाद् बहिरानयनमेव निष्क्रमणम्। बालकस्यायं संस्कारो जन्मतश्चतुर्थे मासे भवति। केषाञ्चन मतेन सूर्यदर्शनं तृतीयमासे चन्द्रदर्शनञ्च चतुर्थमासे विधीयते। तद्यथा वीरमित्रोदये यमस्मृतेः पद्यमुद्धृतम्-

ततस्तृतीये कर्तव्यं मासि सूर्यस्य दर्शनम्।
चतुर्थमासि कर्तव्यं शिशोश्चन्द्रस्य दर्शनम्॥

किन्तु पारस्करगृह्यसूत्रे मानवगृह्यसूत्रे च 'चतुर्थे मासि निष्क्रमणिका। सूर्यमुदीक्षयति तच्चक्षुरिति' इत्येवं चतुर्थमासस्यैव विधानं कृतम्। मनुस्मृतावपि तदेव समर्थ्यते।

निष्क्रमणमुहूर्ते गृहाद् बहिः बालकस्य माता चतुरस्त्रां भूमिं परिष्कृत्य गोमयेनोपलिप्य स्वस्तिचिह्नं कृत्वा तण्डुलान् विकिरति। ततस्तत्र बालकस्य पिता उत्थितः सन् बालकं क्रोडे कृत्वा मन्त्रोच्चारणपूर्वकं सूर्यं दर्शयन् बालकस्य शतायुष्यं कामयते। ब्राह्मणाँश्च दक्षिणादिभिः सन्तोष्य संस्कारोऽयं सम्पाद्यते। रात्रिकालिके निष्क्रमणमुहूर्ते चन्द्रदर्शनं युज्यते।

अन्नप्राशनसंस्कारः

गृह्यसूत्रेषु स्मृतिषु च जन्मतः षष्ठे मासे शिशोः अन्नप्राशनसंस्कारो विहितः। जन्मकाले दधिमधुघृतानां प्राशनमभूत्। पुनर्यदा शिशुरन्नपाचनयोग्यो भवति, तदा षष्ठमासे अन्नप्राशनं संस्कारतया प्रोक्तम्। अन्नं जीवने नितान्तमावश्यकं भवति। तदन्नग्रहणं संस्कारेण समन्वितं स्यादिति प्रतीकं गृहीत्वा संस्कारोऽयं सम्पाद्यते। व्यक्तित्वविकासे आहारशुद्धिरनिवार्या मन्यते। तदुक्तं छान्दोग्योपनिषदि-

"आहारशुद्धौ सत्त्वशुद्धिः[10]
सत्त्वशुद्धौ ध्रुवा स्मृतिः
स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः" इति।

अन्नप्राशनसंस्कारे पदे पदे अन्नदेवस्य स्तुतिर्विहिता संस्कारदिने मन्त्रपाठेन सह भोजनं पच्यते। पिता शिशोः पुष्टये अग्नौ हविर्जुहोति। ततः शिशवे अन्नस्य ग्रासं ददानः पिता 'भुर्भुवः स्वः' इत्युच्चारयति। आयुर्वेदानुसारेण लघुहितमन्नं शिशवे दातव्यम्। दधिमधुघृतमित्रं भक्तं युज्यते। क्षीरात्रेन शिशोरत्रप्राशनं लोके प्रचलति।

परवर्तिकाले अन्नप्राशनावसरे शिशोर्भाविजीवने जीविकाविशेषस्य पूर्वानुमितिः सुपरीक्षिता। तदर्थं देवानां सत्रिधौ बहूनां व्यवसायानां प्रतीका: लेखनी-पुस्तक तुला रुप्यकादयः स्थाप्यन्ते। तेषु प्रथमं यद्वस्तु शिशुरचिनोति, तद्रूपमेव तस्य जीविका सम्भाव्यते।

चूडाकर्मसंस्कारः

'चूडा' इत्यस्यार्थों भवति 'शिखा'। 'चूडाकर्म' इत्यस्य नामान्तरं चौलकर्म, चूडाकरणं, मुण्डनं चेति। चूडाकर्मसंस्कारे केशानां कर्तनं मुण्डनं वा विधाय शिरसि शिखा (चूडा) स्थाप्यते। शिखाधारणं चूडाकर्मसंस्कारस्य प्रधानमुद्देश्यम्। शिखया यज्ञोपवीतेन च विहीनो जनः संस्कारवान् न मन्यते ।

चूडाकरणात् प्रभृति शिखाधारणं भवति। शिखायाः मूले शिरा-सन्धीनां सम्मिलनं भवति। आदायुर्वेदोऽपि शिखायाः महत्त्वं प्रतिपादयति। आश्वलायनगृह्यसूत्रे चूडाकर्म दीर्घायुषे, यशसे ।

चूडाकर्म शिशोः प्रथमे तृतीये पञ्चमे सप्तमे वाऽष्टमे वर्षे क्रियते। उपनयनसमयेऽपि कर्तुं शक्यते। संस्कारोऽयं कुलदेवतायाः सात्रिध्ये जागृते तीर्थे देवमन्दिरे वा भवति। सुमुहूर्त माङ्गलिकं विधानमनुष्ठाय माता बालक क्रोडे कृत्वा उपविशति। पिता मन्त्रोच्चारणपूर्वक सकुशान् केशान् कर्तयित्वा गोमये निधापयति। पश्चात् नापितः मुण्डनेन शिखां सम्यक् सम्पादयति। छिन्नकेशाः सुगुप्ते स्थाने सरोवरे भूमिगतं वा विसर्जिताः क्रियन्ते। शिरसि चूडा कुलरीतिमनसृत्य स्थाप्यते। तद्यथा - "दक्षिणतः चूडा वशिष्ठानाम्, उभयतोऽत्रिकाश्यपानाम्.... यथाकुलधर्म वा"।

कर्णवेधसंस्कारः

नाम्नैव संस्कारस्यास्य स्वरूपं स्पष्टं भवति। वेदेषु प्राचीनगृह्यसूत्रेषु च संस्कारतया कर्णवेधस्य उल्लेखो न लभ्यते। परवर्तिनि युगे संस्कारोऽयं प्राचलदिति सम्भाव्यते। यास्कस्य निरुक्ते कर्णवेधस्य उल्लेखः प्राप्यते।

जन्मनो दशमे षोडशे वा दिने कर्णवेधसंस्कारो प्रोक्तः। बोधायनः सप्तमे अष्टमे वा मासे कर्णवेधं प्रोक्तवान्। गर्गः द्वादशे मासेऽपि कर्णवेधं कथयति। कात्यायनः तृतीये पञ्चमे का वर्षे कर्णवेधस्य विधानं करोति। कर्णयोः वेधनं वैद्यः सुवर्णकारो वा विदधाति। कर्णवेधनाय सूची सौवर्णी राजती लौही वा भवति। बालकस्य प्रथमं दक्षिणकर्णः बालिकायाश्च प्रथमं वामकर्णो विध्यते।

भाविजीवने क्रोधोपशमनाय, अण्डकोशवृद्धिं आन्त्रवृद्धि (हार्निया) च निरोद्धं, कर्णाभूषणं च धारयितुं कर्णवेधो युज्यते। मध्ययुगस्य स्मृतिकारो देवलः कर्णवेधस्य धार्मिक महत्त्वं प्रतिपादयन् लिखति ।

विद्यारम्भसंस्कारः

विद्यारम्भस्यापरं नाम' अक्षरारम्भ' इत्यस्ति। तेन प्रतीयते यद् वर्णमालायाः विकासयुगे संस्कारोऽयं प्रावर्तत इति। गृह्यसूत्रेषु प्राचीनस्मृतिषु चास्य संस्कारस्योल्लेखो नास्ति। परवर्तिकालस्य वीरमित्रोदये, स्मृतिचन्द्रिकायां, संस्काररत्नमालायां, याज्ञवल्क्यस्मृतेः अपरार्कव्याख्यायां चास्य संस्कारस्य प्रमाणमुपलभ्यते। मन्ये पुरा उपनयनादेव विद्यारम्भो भवति स्म। पश्चात् कौटिल्यस्यार्थशास्त्रे भवभूतेरुत्तररामचरिते च चूडाकर्मसंस्कारेण सहैव वेदेतरविद्यारम्भस्य सूचना लभ्यते। तत्पश्चाच्च विद्यारम्भः स्वतन्त्रसंस्काररूपेण प्रवर्तितोऽभूत्। प्रायशः पञ्चमे वर्षे सूर्योत्तरायणे सुमुहूर्ते संस्कारोऽयं विधीयते। सुस्नातः सुवेशश्च बालको गुरोः सम्मुखमानीयते। गणपत्यादिपूजनं हवनं च सम्पाद्य गुरुः प्रसृतेषु तण्डुलेषु अङ्गुल्या लेखन्या वा बालकस्याक्षरारम्भं प्रणवाक्षरेण कारयति।

उपनयनसंस्कारः

उपनयनसंस्कारः संस्कारेषु सर्वप्रधानः स्वीक्रियते। लोको वेदश्चेति द्विधा विभागे लोकाद् वेदे यदानयनं तदुपनयनमुच्यते। उपनयनसंस्कारानन्तरमेव कश्चिद् वेदाध्ययनस्य अधिकारी भवति। लौकिकं ज्ञानमेव पूर्णतायै न भवति। तदर्थं वैदिकं

ज्ञानमपि नितान्तमावश्यकम्। लोकवेदयोर्द्वयोरपि विज्ञाता आचार्यस्तत्र ब्रह्मचारिणां गतिर्भवति। अत एव पाणिनिः उपनयनस्यापरं नाम आचार्यकरणमिति लिखति। आचार्येण ब्रह्मचारिणः स्वीकरणमेवोपनयनम्। आचार्यः स्वभाव- सम्पन्नं शिष्यं स्वीकृत्य वेदविद्यां ब्रह्मविद्यां वा सम्यगध्यापयति । ब्रह्मविद्यायाः सन्धारणादेव शिष्यो ब्रह्मचारी कथ्यते। एतादृगयं संस्कारो द्विजानां द्वितीयं जन्म भवति। आचार्य एवात्र द्वितीयस्य जन्मनः प्रदाता। स एकाकी मातापित्रोः द्वयोरपि, भूमिकां दिव्यतया निर्वहति। व्यवस्थापनात् पितृत्वं तस्य निर्विवादम्। मातृत्वं चापि तस्य प्रतिपाद्यते-

आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः।
तं रात्रीस्तिस्त्र उदरे बिभर्ति तं जातं द्रष्टुमभिसंयन्ति देवाः ।।अथर्ववेदे ११.५.३

वैदिकयुगे माणवकः समित्पाणिः स्वयमेव आचार्यसमीपं गत्वा न्यवेदयत् * ब्रह्मचर्यमागाम्' इति। आचार्यस्तु तस्य परिचयं पृष्ट्वा हस्तं च गृहीत्वा देवादीनां साहाय्येन तमात्मनः ब्रह्मचारिणं करोति। अथ समिदाहरणादिकं कर्मोपदेशं कृत्वा सप्रणवां गायत्रीमुपदिशति। गायत्री वेदमाता कथ्यते। तस्मात् सन्ध्यासु गायत्रीं जपन्, ब्रह्मचारी ब्रह्मचर्याश्रमे वेदोपवेदं वेदाङ्गादिकं आचार्यादधीयानस्तिष्ठति।

परवर्तियुगे उपनयनस्य पद्धतिः दीर्घा कृता। तत्रादौ उपनयनस्य योग्यकालो निर्धारितः। तद्नुसारेण वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यं, शरदिं च वैश्यम्। एवमेव गर्भादष्टमे वर्षे ब्राह्मणस्य, गर्भादकादशे राजन्यस्य, गर्भाद् द्वादशे च वर्षे वैश्यस्योपनयनं प्रोक्तम्। मनुः उपनयनस्य प्राथमिकीं पार्यन्तिकीं चावस्थां निर्धारयति। तद्यथा -

ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे ।
राज्ञो बलार्थिनः षष्ठे वैयस्येहार्थिनोऽष्टमे ॥[11]

प्रचलितायां विस्तृतोपनयनपद्धती कतिपयमुख्यबिन्दवः सन्तिमण्डपाच्छादनं गणपत्यादिपूजनञ्च, बालकस्य मुण्डनं स्नानञ्च, कौपीनधारणमाचार्योपगमनञ्च, मेखलाबन्धनम्, यज्ञोपवीतप्रदानं, अजिन-(मृगचर्म) धारणं दण्डधारणञ्च आचार्येण माणवकाञ्जलौ जलाञ्जलिप्रदानं, सूर्यदर्शनं, हृदयस्पर्शः, अश्मारोहणम्, आचार्येण माणवकस्य हस्तग्रहणं शिष्यतया स्वीकरणञ्ज, व्रतादेशः, गायत्रीमन्त्रप्रदानम्, आह्वनीयाग्निस्थापनं हवनञ्च, भिक्षाटनं

ब्रह्मचर्यव्रतग्रहणञ्चेति।

उपनयनसंस्कारोऽयमधुना यज्ञोपवीतसंस्कार इत्युच्यते। सूत्रनिर्मितस्य आधुनिकयज्ञोपवीतस्य प्रचलनं वैदिकयुगे नासीत्। तदा यज्ञावसरे उत्तरीयं यज्ञोपवीतविधिना ध्रियते स्म। तदुत्तरीयं प्रायशो मृगचर्म एव। तत्स्थाने समग्रं जीवनमेव यज्ञं मत्वा सदैव यज्ञोपवीतस्य धारणं मन्ये सूत्रयुगे प्रवर्तितम्। यज्ञोपवीतसंस्कारस्य पश्चादाचार्यः शिष्यस्य शौचाचार, अग्निकार्य, सन्ध्योपासनं च शिक्षयति।

वेदारम्भसंस्कारः

वेदारम्भो नामायं संस्कारः उपनयनसंस्कारानन्तरं वेदपाठस्यारम्भं सूचयति। गृह्यसूत्रेषु धर्मसूत्रेषु चायं संस्कारः पृथक्तया नोक्तः । सर्वप्रथमं व्यासस्मृती वेदारम्भसंस्कारः

प्रतिपादितः। गौतमः संस्कारगणनायां चतुर्णां वेदव्रतानां ग्रहणं संस्कारतया लिखति। तानि वेदव्रतानि सन्ति-व्रतम्, महाव्रतम्, उपनिषद्व्रतम्, गोदानञ्चेति। तत्र गोदाने गोशब्दस्यार्थो वेदवागेव प्रतीयते। एतेषां चतुर्णां वेदव्रतानां पालनं यदा न्यूनतां गतम्, तदा उपनयन- समावर्तनयोः संस्कारयोर्मध्ये वेदारम्भसंस्कारः पृथक्तया प्रवर्तितः।

उपनयनसंस्कारान्तरं बटुर्यदा वेदाध्यनं प्रारभते, तदायं संस्कारो विधीयते। तेनोपनयनं व्रतादेशस्य स्वरूपमास्थाय तिष्ठति। वेदारम्भश्च स्वतन्त्रः संस्कारो जायते। शुभे मुहूर्ते गुरुः स्वशिष्यं प्रदीपाग्नेः पश्चिमत उपवेशयति। यथोक्तं हवनं च सम्पाद्य वेदाध्ययनं प्रारभ्यते।

केशान्तसंस्कारः

केशान्तसंस्कारस्यापरं नाम गोदानसंस्कारोऽस्ति। व्यासस्मृतौ केशान्तस्य गणना षोडशसंस्कारेषु कृता। गृह्यसूत्रेषु चूडाकर्मसंस्कारेण सहैव पृथक्तया केशान्तस्य वर्णनं लभ्यते। याज्ञवल्क्यस्मृतौ केशान्तः क्षौरकर्म कथ्यते। मनुस्मृतौ केशान्तसंस्कारस्य समयो निर्धार्यते-

केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते।
राजन्यबन्धोर्द्वाविंशे वैश्यस्य द्वयाधिके ततः ।।[12]

अस्मिन् संस्कारे गुरवे गोदानेन सम्भवतो गोदानशब्दः प्रचालितः। गोशब्दस्यार्थो वागपि भवति। इतः पूर्वं वेदानधीत्य गोदानसंस्कारानन्तरं वैदिकव्याख्यानेऽपि प्रवर्तनाद् गोशब्दस्य वेदवागों भवितुमर्हति। तेन वेदारम्भसंस्कारप्रसङ्ग प्रोक्तेषु चतुर्षु वेदव्रतेषु चतुर्थ गोदानाख्यं व्रतमेव स्वतन्त्रसंस्कारतया विकसितं सम्भवति। गोशब्दस्यार्थः केश-श्मश्रु-लोमादिरपि भवति। तेन केशान्तो गोदानस्य पर्यायो भवति।

समावर्तनसंस्कारः

विद्याध्ययनं परिसमाप्य गुरोराश्रमाद् गृहागमनं समावर्तनम्। समावर्तनसंस्कारे विद्यासम्पन्नस्य ब्रह्मचारिणो विधिवत् स्नानं भवति। स्नानमिदं परिलक्ष्य समावर्तनस्य नामान्तरं स्नानमेव। समावर्तनसम्बन्धि स्नानमिदं कृत्वैव ब्रह्मचारी स्नातको भवति। स्नातकास्त्रिविधाः भवन्ति। विद्यया स्नातीति विद्यास्नातकः। व्रतेन (अष्टचत्वारिंशत्सङ्ख्याकेन) स्नातीति व्रतस्नातकः। विद्यया व्रतेन च स्नातीति विद्याव्रतस्नातकः । तस्मादिदं समावर्तनकालिकं स्नानं किमप्यसाधारणमेव स्नानं भवति । तादृशं स्नानं यः करोति स एव स्नातकपदवीं लभते । तथाभूतेन समावर्तनस्नानेन स्नातः स्नातकः समाजे सर्वत्र सम्मानितो भवति।

पाणिनिः स्नातकस्य पर्यायं 'स्रग्वी' इति निर्दिशति । इदं नाम स्नातकस्य मालाधारणमुद्दिश्य कृतम्। मालायामपि पुष्पाणां यद् ग्रथनं तद्वस्तुतो विद्यानां व्रतानां चैव ग्रथनमिति तात्पर्यं प्रतीयते। स्रग्वीति कथनेन सूच्यते। यत्समावर्तने स्नातकस्य वेशविन्यासः सालङ्कारो भवतीति। विद्याव्रतादिभिः सुस्नातः सुसज्जितश्च स्नातकः सुतरां शोभते। अथर्ववेदानुसारेण-

स स्नातो बधुः पृथिव्यां बहु रोचते।

समावर्तनसंस्कारे स्नातकः आचार्यं न्यवेदयत् "त्त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि" इति। आचार्योऽपि तदा स्नातकस्य शाश्वतीं शिक्षां प्रोवाच- "सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्।

भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्।

देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। यान्यनवद्यानि कर्माणि तानि सेवितव्यानि, नो इतराणि। यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि, नो इत्तराणि।"

केचन ब्रह्मचारिणः समावर्तनकाले आचार्याय दक्षिणां दातुमिच्छन्ति। रघुवंशमहाकाव्ये आचार्यस्य कृते कौत्सस्य गुरुदक्षिणायाः रम्या कथा अस्ति। साधारणतस्तु, गुरुदक्षिणा स्वल्पैव भवति। तदुक्तं मनुस्मृतौ-

क्षेत्रं हिरण्यं गामश्वं क्षत्रोपानहमन्ततः।
धान्यं शाकं च वासांसि गुरवे प्रीतिमाहरन्।।

विवाहसंस्कारः

संस्कारभावनया विधीयमानो विवाह एव विवाहसंस्कार इत्युच्यते। संस्कारस्तु शास्त्रोक्त एवेति शास्त्रविधिमुत्सृज्य विवाहो न युज्यते। विवाहे विवाहपूर्वसंस्काराणां ब्रह्मचर्यादीनां प्रतिफलनं भवति। याज्ञवल्क्यस्मृतौ "अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत्" इत्युक्तम्। अथर्ववेदे चोक्तं "ब्रह्मचर्येण कन्या युवानं विन्दते पतिम्" इति। तदेवं ब्रह्मचर्यादि- संस्कार- सम्पन्नयोरेव स्त्रीपुंसोः सम्बन्धविशेषः शास्त्रानुमोदितो भवति। स च वैवाहिकः सम्बन्धः शास्त्रोक्तैः मन्त्रैः विधिभिः च सम्पद्यते। वैवाहिकी निष्ठव अत्यावश्यकी भवति। मनुराह-

पाणिग्रहणिकाः मन्त्राः नियतं दारलक्षणम्।
तेषां निष्ठ तु विज्ञेया विद्वद्भिः सप्तमे पदे।।

'सप्तपदी' विवाहस्य प्रधानः विधिरस्ति। तद्नुसारेण विवाहः सप्तजन्मनां सम्बन्धेन प्रतिफलति। 'नियतं दारलक्षण' मिति यदुक्तं तस्यार्थोऽपि विज्ञेयः। तदनुसारेण वैवाहिकः सम्बन्धः केवलं लौकिकसम्बन्ध एव नास्ति। अलौकिकेनापि नियमेन सम्बन्धोऽयं नियमितस्तिष्ठति। अत एव लौकिकेनैव कारणेन सम्बन्धविच्छेदो नैवात्र सम्भवति। कात्यायनस्तत्र कथयति-

न निष्क्रयविसर्गाभ्यां भर्तुर्भार्या वियुज्यते।

भारतीयसंस्कृतौ विवाहस्तु सन्तानकामाय, लौकिकसुखाय, यज्ञाधिकाराय, धर्मसम्पादनाय च भवति। संस्कारस्यास्य सातिशयं महत्त्वमस्ति। ब्रह्मचर्याश्रमे ब्रह्मचर्यमिव गृहस्थाश्रमे दाम्पत्यं प्रशस्यते। गृहिणीं विना कश्चिदपि गृही न भवति।

गृहिणी गृहमित्याहुर्न गृहं गृहमुच्यते। गृहस्थाश्रमो यज्ञपरः प्रोक्तः। यज्ञाधिकारश्च सपत्नीकस्यैव सम्भवति। सा पत्नी पुरुषस्यार्धाङ्गिनी। तस्यां पुत्रं सम्प्राप्य पुरुषः पितृणां ऋणाद् मुक्तो भवति। 'आत्मा वै जायते पुत्रः' इत्यात्मतन्तुः संरक्ष्यते। तत्सर्वं विवाहसंस्काराधीनम्। तस्माद् विवाहस्य संस्कारमयता सर्वथैव संरक्षणीया।

मनुना विवाहस्य अष्टौ भेदाः कृताः- ब्राह्मविवाह:, दैवविवाहः, आर्षविवाहः, प्राजापत्यविवाहः, आसुरविवाहः, गान्धर्वविवाहः, राक्षसविवाहः, पैशाचविवाहश्च। मनुस्मृतौ एतेषां विवाहानां लक्षणानि यथा-

यज्ञे तु विवते सम्यगृत्विजे कर्म कुर्वते।
आलङ्कृत्य सुतादानं दैवं धर्मं प्रचक्षते।।
एकं गोमिथुनं द्वे वा वरादादाय धर्मतः।
कन्याप्रदानं विधिवदार्षो धर्मः स उच्यते ।।
सहोभौ चरतां धर्ममिति वाचाऽनुभाष्य च।
कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः॥

एतेष्वष्टविधविवाहेषु ब्राह्मणादीनां कृते यथायोगं केचित् प्रशस्ताः, केचिदप्रशस्ताश्च कथ्यन्ते। सामान्येन प्रारम्भिकाश्चत्वारो धर्माः, पार्यन्तिकाश्चाधर्ष्याः प्रोक्ताः। यथाकथञ्चित् केषाजन कृते पडमषष्ठावपि (आसुरगान्धर्वाख्यौ) धर्मानुकूलौ स्याताम्। किन्तु सप्तमाष्टमौ (राक्षसपैशाचौ) सर्वथैव धर्मविरुद्धौ परित्याज्यौ च स्तः। अर्थादेतेषु विवाहभेदेषु संस्कारस्य वास्तविकोऽर्थः सर्वत्र नावलोक्यते। एते विवाहा यथायोगं स्त्रीप्राप्तेरुपायभूताः सन्ति। वैवाहिकः संस्कारविधिस्तदन्तरं सम्पादनीयः। तदुक्तं देवलेन-

प्राप्तेषूर्ध्वं विवाहेषु विधिर्वैवाहिकः स्मृतः।
कर्तव्यश्च त्रिभिर्वर्णैः समयेनाग्निसाक्षिकः ।।

अन्यथा-

विवाहमात्रं संस्कारं शूद्रोऽपि लभते सदा।

सगोत्रेषु सपिण्डेषु समानप्रवरेषु च विवाहो निषिद्धः। अनुलोम-प्रतिलोमयोर्मध्ये अनुलोमविवाह एव शास्त्रसम्मतो भवति । तदनुसारेण ब्राह्मणक्षत्रियवैश्यवराणां क्रमशः चतुस्त्रिद्विवर्णोत्पन्नाभिः कन्याभिर्विवाहो योग्यः।

षड्वर्षादुर्ध्वं रजोदर्शनात् पूर्वञ्च कन्यानां विवाहः पुरा प्रशंसितः । भागवतानुसारेण –

ययोरात्मसमं वित्तं जन्मैश्वर्याकृतिर्भवः ।
तयोर्विवाहो मैत्री च नोत्तमाधमयोः क्वचित्।।

अन्त्येष्टिसंस्कारः

निवृत्तिप्रधानः अन्त्येष्टिसंस्कारः सर्वैरपि शास्त्रकारैः संस्कारतया न गण्यते। बहुभिराचार्यैः संस्कारप्रकरणादन्यत्र पृथक्तया अन्त्येष्टिविषये विलिखितम्। तेषां मतेन विवाह एव चरमः संस्कारः। तदनुसारेण विवाहसंस्कारानन्तरं गर्भाधानादिसंस्काराः एवं पुनरावर्तन्ते। यद्यपि ऋग्वेदे अथर्ववेदे च अन्त्येष्टिक्रियासु प्रयोज्याः मन्त्राः सन्ति, तथापि गृह्यसूत्रेषु, धर्मसूत्रेषु, स्मृतिषु संस्कारोऽयं प्रायशः उपेक्षित एव। आश्वलायन-बौधायन-पारस्कर-गृह्यसूत्रेषु अन्त्येष्टिसंस्कारः परिगणितोऽस्ति। हिरण्यकेशिगृह्यसूत्रे अन्त्येष्टिक्रियाकलापानां प्रतिपादनं कृतम्। मनुस्मृतौ - "निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः"

इत्युल्लिख्य अन्त्येष्टिं संस्कारतया स्पृशति, पितृणां प्रीतये श्रद्धादिकं च वर्णयति। याज्ञवल्क्यस्मृतावपि संस्कारोऽमयुल्लिखितः। श्राद्धकल्पेषु अन्त्येष्टिसंस्कारस्य विषयाः पर्याप्तं प्रतिपादिताः। परवर्तिकाले अन्त्येष्टिमधिकृत्य बह्व्यः बह्व्यः पद्धतयोऽपि विलिखिताः।

अन्त्येष्टिः हिन्दूजीवनस्य चरमः संस्कारोऽस्ति। अन्त्या अन्तिमा, इष्टिः- यज्ञः। तस्मादयं संस्कारो जीवनस्यान्तिमयज्ञ एव। संस्कारोऽयं मृत्योरनन्तरं शवदाहादिरूपो भवति। संस्कारस्यास्य सम्यक् सम्पादनेन मृतकस्याग्रिमं जन्म निर्बाधं सम्पद्यते। गीतायामुक्तम्-

वासांसि जीवर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णा-
न्यन्यानि संयाति नवानि देही ।।[13]

सन्दर्भः

1. तैत्तिरीयसंहिताभाष्यम् - उपोद्घातः

2. पा.शि.41-42
3. क.श्रौ.सू. 1.1.1
4. क.श्रौ.सू. 1.1.2
5. क.श्रौ.सू. 1.1.3
6. मनु.स्मृ. 3.48
7. मनु.स्मृ.2.29
8. मनु.स्मृ. 2.30
9. मनु.स्मृ. 2.30, 31,32,33
10. छान्दोग्य उप. 7.26.2
11. मनु.स्मृ.2.37
12. मनु.स्मृ. 2.65
13. श्रीमद्भगवद्गीता 2.22

सन्दर्भग्रन्थसूची -

- कात्यायन श्रौतसूत्रम्,जमुना पाठक, चौखम्बा प्रकाशन, वाराणसी, 2010
- मनुस्मृति, हरगोविन्द शास्त्री , चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००५
- वैदिक साहित्य का इतिहास, राममूर्ति शर्मा, खम्बा प्रकाशन, वाराणसी, २०१०
- श्रीमद्भगवद्गीता, गीता प्रेस, गोरक्षपुर, 2005

* * *

भारतीयदर्शनेषु प्रामाण्यवादविमर्शः

डॉ. विनयगोपालत्रिपाठी

सर्वे भारतीयदार्शनिकाः प्रामाण्यवादमाश्रित्य स्वविचारं प्रास्तुवन् । प्रमाणशब्दस्य व्युत्पत्त्यनुसारं प्रामाण्यस्यार्थद्वयं भवति । प्रमीयतेऽनेन इति व्युत्पत्त्या प्रमाणशब्दस्यार्थः[1] प्रमाकरणमिति । प्रमीयते इति प्रमाणमनया व्युत्पत्त्या प्रमाणशब्दस्यार्थः प्रमा ।[2] तथा च प्रमाणस्य भावः प्रमाण्यमिति तर्हि प्रामाण्यं प्रमाकरणत्वमिति अथ च प्रमात्वमिति । प्रमायाः करणत्वं प्रमाणस्य लक्षणं भवति । किं नाम प्रमा ? इति जिज्ञासायाम् अन्नंभट्टैरुच्यते तद्वति तत्प्रकारकोऽनुभवो यथार्थः । यथा अयं घटः इति ज्ञानम् । सैव प्रमा इत्युच्यते ।[3] तद्वति इत्यत्र सप्तम्यर्थः विशेष्यित्वमाशयतय सम्बन्धेन अनुभवान्वयि । एवञ्च तद्वद्विशेष्यकतत्प्रकारकानुभवत्वं प्रमायाः लक्षणम् । तत्पदार्थः प्रकारः तद्वत्वं प्रकारतावच्छेदकसम्बन्धेन बोध्यम् । तथा च कालिकसम्बन्धेन शुक्त्यादौ रजतत्वसत्त्वेऽपि इदं रजतमिति भ्रमस्थलेऽतिव्याप्तिः न भवितुमर्हति । तथाऽपि रङ्गत्वेन रजतावगाहिनि रजतत्वेन च रङ्गावगाहिनी 'इमे रङ्गरजते इत्याकारकसमूहालम्बनभ्रमेऽतिव्याप्तिर्दुर्वारैव । यतो हि रङ्गविशेष्यकत्वरङ्गप्रकारकत्वयोः रजतविशेष्यकत्वरजतत्वप्रकारकत्वयोश्च समूहालम्बनात्मकज्ञाने सत्त्वादिति चेन्न । तद्वद्विशेष्यकतत्प्रकारकानुभवत्वस्य तात्पर्यमस्ति, तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वविशिष्टानुभवत्वमेव प्रमायाः लक्षणम् ।[4] विश्वनाथपञ्चाननभट्टाचार्यो वदति यत् भ्रमभिन्नत्वे सति ज्ञानत्वं प्रमायाः लक्षणम् । अथवा तद्वद्विशेष्यकत्वे सति तत्प्रकारकत्वे सति ज्ञानत्वं प्रमायाः लक्षणम् । अत्र विश्वनाथो भणति यत् येन सम्बन्धेन यद्वत्ता तेन सम्बन्धेन तद्वद्विशेष्यकत्वं तेन सम्बन्धेन तत्प्रकारकत्वं वाच्यम् ।[5] दिनकरीकारः प्रमालक्षणस्य परिष्कारं यद्भया पूर्वं निरूपितं तदेव दिनकर्यां वदति । तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्ववज्ज्ञानमिति। प्रकृतस्थले प्रामाण्यशब्देन प्रमात्वमर्थं स्वीकृत्य चर्चामहे । एवमप्रामाण्यं नाम अप्रमात्वं किमपि ज्ञानं प्रामाण्यात् प्रमारूपं भवति, अप्रामाण्याच्च अप्रमारूपं भवति ।

प्रामाण्यीकरणविषये याः समस्याः समुत्पन्नाः भवन्ति ताभिः भिन्नसमस्या अप्रामाण्यीकरणे समुत्पन्ना भवति । भारतीयदार्शनिकाः प्रमात्वमप्रमात्वञ्च विषये पृथक्-पृथक् विचारमकुर्वन् । प्रामाण्याप्रामाण्ययोः सम्बन्धविषये अपरया दृष्ट्या अपि विचारः क्रियते ज्ञप्तिः उत्पत्तिश्च । ज्ञप्तिशब्दार्थः ज्ञानस्य दृष्ट्या, उत्पत्तिशब्दार्थः उत्पत्तेः दृष्ट्या । सर्वे भारतीयदार्शनिकाः अनयोः भेदः सम्यग्रूपेण नाकुर्वन् । स्वतः प्रामाण्यवादः स एव अस्ति यः ज्ञानस्य प्रामाण्यीकरणं केनचिदन्येन ज्ञानेन न स्वीकरोति । स्वतः प्रामाण्यवादस्यानुसारं प्रत्येकस्मिन् ज्ञाने प्रामाण्यं स्वतः भवति । यस्यार्थो विद्यते यज्ज्ञानस्य कारणं तदेव ज्ञानप्रामाण्यस्य कारणं भवति । उभयोः कारणं पृथक्-पृथक् न भवति अपितु एकमेव भवति अर्थात् यैः कारणैः ज्ञानमुत्पद्यते तैः कारणैः ज्ञानस्य प्रमात्वमपि जायते । अस्य सिद्धान्तानुसारं ज्ञानेन सहैव तस्य प्रामाण्यमपि स्वतः ज्ञातं भवति । अयमेव ज्ञप्तेः दृष्ट्या स्वतः प्रामाण्यवादो विद्यते । उत्पत्तेः दृष्ट्या स्वतः प्रामाण्यवादस्यार्थ अस्ति यत् यैः कारणैः ज्ञानमुत्पद्यते तै कारणैः ज्ञानस्य प्रामाण्यमपि उत्पद्यते । अनेन रूपेण ज्ञानस्य ज्ञानप्रामाण्यस्य च एकमेव कारणं भवति । अतः ज्ञानं स्वतः प्रमारूपत्वं भवति ।

परतः प्रामाण्यवादः स एव विद्यते यदा वयं किमपि ज्ञानं कुर्मः तत्र तस्य प्रामाण्यविषये कश्चन निश्चयः न भवति । अन्यतरमन्येन ज्ञानेन वा हेतूना तस्य ज्ञानप्रामाण्यस्य ज्ञानं भवति । अत एव केनचिदुक्तं ज्ञानग्राहकातिरिक्तापेक्षत्वं परतस्त्वम् ।[6] अनेन रूपेण उत्पत्तेः दृष्ट्या तस्य मान्यता विद्यते यत् ज्ञानस्य तथा च तस्य प्रामाण्स्योत्पत्तिः भिन्नैः भिन्नैः कारणैः जायते । ज्ञप्तिपरतस्त्वस्य लक्षणं विद्यते, ज्ञानमात्रग्राहकसामग्रीभिन्नसामग्रीग्राह्यत्वमिति[7] , ज्ञानमात्रग्राहकसामग्रयतिरिक्त-कारणप्रयोज्यत्वम् वा। अनेन रूपेण स्वतः अप्रामाण्यवादस्य परतः अप्रामाण्यवादस्य च अर्थमपि ज्ञातं भवति । स्वतः अप्रामाण्यवादानुसारं कस्यापि ज्ञानस्य अप्रामाण्यस्य ज्ञानं यया सामग्रया जायते तया सामग्रया ज्ञानस्याप्रामाण्यमपि जायते । अयमेव ज्ञप्तिः दृष्ट्या स्वतः अप्रामाण्यवादोऽस्ति । उत्पत्तेः दृष्ट्या ज्ञानस्य अथ च तस्य अप्रामाण्यस्य कारणमेकमेव भवति । यदा उभयोः कारणं भिन्नं भिन्नं भवति तदा अप्रामाण्यं परतः इति विद्वांसः वदन्ति । प्रामाण्यस्य स्वतस्त्वम्, प्रामाण्यस्य परतस्त्वम्, अप्रामाण्यस्य स्वतस्त्वम्, अप्रामाण्यस्य

परतस्त्वमेतस्मिन् विषये भारतीयदार्शनिकेषु मतभेदो विद्यते । तथा च स्वतः परतः प्रामाण्यमप्रामाण्यञ्च स्वतो भवति । नैयायिकाः उभयोः परतस्त्वं स्वीकुर्वन्ति । बौद्धदार्शनिकानां मते प्रामाण्यस्य परतस्त्वमप्रामाण्यस्य स्वतस्त्वञ्च भवति । मीमांसकमते प्रामाण्यं स्वतः अप्रामाण्यञ्च परतः भवति । शान्तरक्षितप्रभृतयः बौद्धाः वदन्ति यत् प्रामाण्यमन्यासु अवस्थासु परतो भवति । अनेन रूपेण अप्रामाण्यस्यापि अवस्थासापेक्षत्वात् परतस्त्वमपि भवति । माध्यमिकबौद्धाः अस्य प्रश्नस्य समाधाने क्लिष्टत्वमनुभवन्ति । माधवाचार्यः सर्वदर्शनसङ्ग्रहे ज्ञानस्य प्रामाण्यविषये ज्ञानस्य अप्रामाण्यविषये च चतुर्णां सिद्धान्तानां वर्णनं कुर्वन्ति । तान् सिद्धान्तान् स्वीकृत्य सांख्यदर्शनं ज्ञानस्य प्रामाण्यविषयेऽप्रामाण्यविषये स्वतस्त्वमेव स्वीकरोति । न्यायवैशेषिकयोः मते येन हेतुना ज्ञानं भवति तदतिरिक्तहेतुना ज्ञानस्य प्रामाण्यं गृह्यते । अतः इदं मतं परतस्त्ववादी वर्तते । मीमांसकमते ज्ञानमान्तरिकरूपेण बौद्धो वर्तते । अत्र मतत्रयं विद्यते । प्रभाकरगुरुमतं मुरारिमिश्रमतं कुमारिलभट्टमतञ्च । एतेषां मते येन हेतुना ज्ञानं गृह्यते तेनैव हेतुना ज्ञानप्रामाण्यमपि गृह्यते । अतः एतेषु मतेषु ज्ञानस्य प्रामाण्यं स्वतो भवति । अप्रामाण्यं च परतो भवति । स्वतः परतः प्रामाण्यविषये अप्रामाण्यविषये भारतीयदार्शनिकानां या दृष्टिरस्ति तस्य विवेचनमधोलिखितं विद्यते।

1. न्यायवैशेषिकयोः मते प्रामाण्यं परत अप्रामाण्यञ्च परतो भवति ।[8]
2. सांख्ययोगयोः मते प्रामाण्यं स्वत अप्रामाण्यञ्च स्वतो भवति ।[9]
3. बौद्धमते प्रामाण्यं परत अप्रामाण्यञ्च स्वतो भवति ।[10]
4. मीमांसामते प्रामाण्यं स्वत अप्रामाण्यञ्च परतो भवति ।[11]
5. रामानुजाचार्यमते प्रामाण्यमबाधितज्ञानमस्ति । अत एव प्रामाण्यस्य मानदण्डः अबाधकत्वमस्ति । यद्ज्ञानं बाधितं भवति तच्च ज्ञानं अप्रमा अस्ति ।
6. मधुसूदनसरस्वतीमते प्रामाण्यं नाम ज्ञानस्य यथार्थपरिच्छेदसामर्थ्यम् ।

नैयायिकाः वदन्ति यत् कश्चन अपि मनुष्यः जलादिज्ञानं कृत्वा तस्य प्रामाण्यं ज्ञातुं प्रवृत्तो भवति तदनन्तरं स च यत्र जलं पश्यति तत्र गच्छति । जलं प्राप्य अनुमिनोति मम जलज्ञानं प्रमा आसीत् सफलप्रवृत्तिजनकत्वात् । केशवमिश्रः तर्कभाषायां

प्रामाण्यवादविषये महामीमांसकस्य कुमारिलभट्टपादस्य मतमेव अखण्डयत् । स वदति प्रामाण्यवाद इत्यत्र प्रामाण्यशब्दार्थः प्रमाणस्य भावः । अत्र भावार्थे ष्यञ् प्रत्ययो भवति, भावार्थे त्वप्रत्यय अपि भवति । प्रमाणस्य भाव इत्यस्यार्थः प्रामाण्यं प्रमाणत्वं वा तस्यार्थः ज्ञानस्य यथार्थता । अत एव तर्कभाषाकारो वदति यत् ज्ञानस्य याथार्थ्यलक्षणं प्रामाण्यम् ।[12] प्रामाण्यसम्बन्धिवादः प्रामाण्यवादः । सर्वप्रथमं प्रामाण्यविचारः वेदानां प्रामाण्यविषये अभवत् । मण्डनमिश्रस्य गृहस्य विषये केनचिदुक्तम् – स्वतः प्रमाणं परतः प्रमाणं कीराङ्गना यत्र गिरो गिरन्ति । द्वारस्थ नीडान्तर-सन्निरुद्धा जानीहि तन्मण्डन पण्डितौकः ।। अत्र नैयायिकाः वदन्ति प्रवृत्ते पूर्वं प्रामाण्यस्य निश्चयो न भवति अपितु प्रवृत्तिसाफल्यात् प्रामाण्यमनुमीयते ।

न्यायनये ज्ञानस्य ग्रहणमनुव्यवसायेन भवति एवञ्च प्रामाण्यस्य ग्रहणं प्रवृत्तिसाफल्यमूलकानुमानेन भवति । यत्र ज्ञानग्राहिका तत्प्रामाण्यग्राहिका सामग्री च एकैव अस्ति तत्र ज्ञानस्य प्रामाण्यं स्वतः अस्ति इत्युच्यते । अत एव तर्कभाषाकारो वदति ज्ञानग्राहकातिरिक्तानपेक्षत्वमेव स्वतस्त्वं प्रामाण्यस्य ।[13] शास्त्रेषु प्रामाण्यस्य अप्रामाण्यस्य वा स्वतस्त्वं द्विविधं भवति, उत्पत्तिः ज्ञप्तिश्च । उत्पत्तौ स्वतस्त्वं नाम ज्ञानकारणमात्रजन्यत्वम् । ज्ञानं येन जायते तेनैव प्रमाणं सदैव जायते इति । ज्ञप्तौ स्वतस्त्वं तु ज्ञानग्राहकमात्रग्राह्यत्वम् । येन ज्ञानं जायते तेनैव प्रमाणं सदैव ज्ञायते । परतस्त्वमपि द्विविधं भवति उत्पत्तौ ज्ञप्तौ च । तत्र उत्पत्तौ परतस्त्वं च ज्ञानकारणातिरिक्तकारणजन्यत्वम् । इन्द्रियार्थसंयोगादिना ज्ञानं जायते तदतिरिक्तेन गुणेन दोषेण वा तज्ज्ञानस्य प्रामाण्यं वा अप्रामाण्यं जायते । ज्ञप्तौ परतस्त्वं च ज्ञानग्राहकातिरिक्तग्राह्यत्वम् । ज्ञानञ्च मनसा गृह्यते तद्गतं प्रामाण्यमनुमानेन गृह्यते । परतस्त्वविषेय अनुमानस्याकारो विद्यते, विमतं जलज्ञानम्, समर्थप्रवृत्तिजनकत्वात् । अनभ्यासदशायामनुमानप्रयोगो विमतं जलज्ञानं प्रमाणं समर्थप्रवृत्तिजनकज्ञानजातीयत्वात् ।

मीमांसकानां मतमुपस्थापयन् आह – तत्त्वचिन्तामणिकारः 'ननु स्वत एवास्तु तन्निरूपणम्' ।[14] अत्र दीधितिकारो वदति स्वतः स्वस्मात् स्वकीयात् । तत्र स्वप्रकाशतया तेनैव तत्प्रामाण्यं गृह्यते इति गुरुवः ।[15] तदनुव्यवसायेनेति मिश्राः ।[16] ज्ञानस्यातीन्द्रियतया ज्ञाततालिङ्गकानुमित्येति भट्टाः ।[17] स्वतः इत्यत्र स्वपदमात्मपरं

प्रामाण्यवादस्थले आत्मपदेन प्रामाण्याश्रय एव गृह्यते पञ्चम्यर्थः प्रयोज्यत्वं तत्पदस्य पूर्वपरामर्शकतया तन्निरूपणमत्र तत्पदेन प्रामाण्यं गृह्यम्, निरूपणं व्यवहारः स च इदं ज्ञानं प्रमा इत्याकारकशब्दप्रयोगरूप अन्ययोगस्य व्यवच्छेदार्थक एव पदमिति न अपि तु अयोगव्यच्छेदार्थकः एव पदम् । एवञ्च प्रामाण्याश्रयनिष्ठ-प्रयोजकतानिरूपितप्रयोज्यत्वसम्बन्धाभावाभाववान् प्रामाण्यव्यवहारः इति तत्त्व-चिन्तामणिग्रन्थस्यार्थः । स्वप्रकाशतया प्रामाण्यं गृह्यते इति गुरुवः प्रभाकराः स्वप्रकाशतया इत्यत्र प्रयोज्यत्वं तृतीयार्थः । तथा च स्वप्रकाशताप्रयोज्यतद्भिन्नग्रहविषयवत् प्रामाण्यम् । अत्र गदाधरभट्टाचार्यैः उच्यते - 'ननु स्वत एवेति मीमांसकत्रयस्यैव प्रत्यवस्थानम्, न तु गुरोरेव मिश्रभट्टयोरेव वा मतत्रयसाधारणविप्रतिपत्तेरग्रे दर्शनीयत्वात्, अनुव्यवसायेनानुमित्या स्वप्रकाशेन वा गृह्यते इत्यादिना मतत्रयसाधारणस्वतस्त्वस्य व्यवस्थापनीयत्वाच्च, एवं च स्वपदस्य प्रामाण्याश्रयमात्रपरत्वे तदीयमात्रपरत्वे वा न मतत्रयसाधारण्यमतस्तदुभयपरतया व्याचष्टे स्वत इति । स्वस्मादिति ।[18] प्रामाण्याश्रयव्यवसायादेव प्रामाण्यव्यवहारः । मुरारिमिश्रकुमारिलभट्टयोः मतानुसारेण स्वकीयात् स्वप्रयोज्यत्वात् प्रामाण्यव्यवहारः । मुरारिमिश्रमते व्यवसायजन्यो अनुव्यवसाय एव प्रामाण्यप्रयोजको भवति । कुमारिलभट्टमते व्यवसायजन्या ज्ञाततारूपहेतुः जन्यानुमितिरेव ज्ञानस्य ज्ञानं ज्ञानस्य प्रामाण्यञ्च भवति । मिश्रमते व्यवसायजन्योऽनुव्यवसायः एव प्रमात्वस्य प्रयोजकः । भट्टमते लिङ्गकानुमितिरेव प्रामाण्यस्य प्रयोजिका । प्रभाकरगुरूणां मते स्वविषयकत्वमेव ज्ञानस्य स्वप्रकाशत्वम् । गुरुमते चक्षुसंयोगानन्तरमयं घटः घटमहं जानामि इति प्रत्यक्षस्यैव उत्पत्त्या ज्ञातृज्ञानज्ञेयमेतत् तृतीयविषयकत्वमेव ज्ञानं तत्र च ज्ञानं स्वस्वरूपतया स्वं गृह्णाति । चात्मानं विषयतया च घटमवगाहते । गुरुमते ज्ञानमात्रस्य यथार्थत्वेन अप्रमात्मकज्ञानमेव नास्ति । या सामग्री ज्ञानं जनयिष्यति सैव तादृशज्ञाने प्रामाण्यमपि ग्राहयिष्यति । तन्मते ज्ञानत्वस्य ज्ञानधर्मिकप्रामाण्यज्ञानत्वस्य च समनियततया समनियतधर्मावच्छिन्नकार्योत्पादिका सामग्री समनियतधर्मान्तरावच्छिन्नकार्योत्पादिका इति सिद्धान्तो विद्यते । तथा च प्रभाकरमते अयं घटः घटमहं जानामि इत्याकारकज्ञानस्य जायमानत्वेन स्वस्यैव

पाणिनीयाष्टके सन्ति अष्टाशीतिसंख्याकानि संज्ञासूत्राणि । एभिः संज्ञासूत्रैः भगवता व्याकरणशास्त्रसम्बद्धपारिभाषिकशब्दानां परिचयः अकारि । तत्र च केषुचित् सूत्रेषु तपरकरणं कृतं वर्तते । यथा – "वृद्धिरादैच्", "अदेङ्गुणः", "ईदूदेद्द्विवचनं प्रगृह्यम्" "ओत्", "ईदूतौ च सप्तम्यर्थे" इत्यादिषु । तच्च तपरकरणं "तपरस्तत्कालस्य" इति सूत्रप्रवृत्त्यर्थमिति विदित विषय एव । परं क्वचित् स्थलेषु असंदेहार्थम्, मुखसुखार्थं वा तपरकरणं कृतं वर्तते । एतेषु प्रत्येकस्मिन्नपि सूत्रे तपरकरणस्य प्रयोजनं किमित्यत्र विचार्यते ।

सर्वप्रथमं वृद्धिरादैच्[१] इति संज्ञासूत्रं अष्टाध्याय्यां प्रथमाध्यायस्य प्रथमपादे पाणिनिना सङ्कीर्तितम् । आकार-ऐकार-औकाराणां वृद्धिरिति संज्ञां बोधयति प्रकृतसूत्रम् । सूत्रेऽस्मिन् 'आत्' इति तपरनिर्देशः कृतः । "वृद्धिरादैच्" इति सूत्रे भाष्ये प्रश्नः क्रियते "अथ किमर्थमाकारः तपरः क्रियते"[२] इति । आकारस्य अनण्त्वात् ह्रस्वप्लुतभेदानां ग्रहणं न संभवत्येव "अणुदित्सवर्णस्य चाप्रत्ययः" इति सूत्रेण । एवं स्थिते किमर्थं आकारस्य तपरनिर्देशः आवश्यकः? इति चेत्तत्रैवं समाधीयते

"आकारस्य तपरकरणं सवर्णार्थम्" इति । दीर्घस्याकारस्य ये षड्भेदाः सन्ति तेषां आकारेण ग्रहणं यथा स्यात् इत्येतदर्थं तपरनिर्देशः क्रियते । के ते षड्भेदाः इति चेत् - उदात्तानुदात्तस्वरिताः । किमर्थं तेषां ग्रहणं न भवति ? इति चेत् भेदकाः उदात्तादयः भवन्ति । अतः यादृशस्वरविशिष्टः वर्णः उच्चार्यते तादृश-स्वरविशिष्टैस्यैव ग्रहणं भवति, न तु स्वरान्तरविशिष्टस्यापि । यथा लोके – आचार्येण वेदमन्त्राणां अध्यापनावसरे यदि शिष्येण उदात्ते कर्तव्ये अनुदात्तः पठ्यते, तर्हि सः शिष्यः चपेटया शिक्षितो भवति । उक्तं हि भाष्ये – "य उदात्ते कर्तव्ये अनुदात्तं करोति खण्डिकोपाध्यायः तस्मै चपेटां ददाति, अन्यत् त्वं करोषि"[३] इति । तेन ज्ञायते यत् उदात्तादयः भेदकाः भवन्तीति ।

अथवा भेदकाः गुणाः इति वा स्वीकर्तव्यम् । यतोहि आनुनासिक्यादयः गुणाः अपि आकारस्य भवन्तीति हेतोः गुणशब्दस्य कथनेन सर्वेषामपि धर्माणां संग्रहो जायते । तदुक्तं कात्यायनेन "भेदकत्वात्गुणस्य इति वक्तव्यम्"[४] इति । गुणाः भेदकाः । लोकेऽपि दृश्यते यथा – जलस्य एकत्वेऽपि उष्ण-शैत्यादिगुणान्तरयोगात् "शीतजलं अन्यत्", "उष्णजलं अन्यत्" इत्यादि पृथक् पृथक् व्यवहारः अवलोक्यते । तेन ज्ञायते यत् गुणाः भेदका इति । स्थिते चैवं "वृद्धिरादैच्" इति सूत्रे यदि आकारस्य तपरनिर्देशः न क्रियते, तर्हि एकगुणविशिष्टस्यैव आकारस्य वृद्धिसंज्ञा स्यात्, अन्येषां पञ्च प्रभेदानां सा न स्यात्, अतस्तपरकरणम् ।

परं अभेदकाः गुणाः इति पक्षे तपरकरणस्य व्यर्थता एव स्यात् । यथा लोके देवदत्तः मुण्ड्यपि, जट्यपि, शिख्यपि 'देवदत्त' इति स्वामाख्यां न जहाति इत्यतः गुणानामभेदकत्व - पक्षः एव सिध्यति । एष एव पक्षः न्याय्य इति भाष्यकाराणामाकूतिः । अयं च पक्षः "अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः"[५] इति अनङ्विधायकसूत्रस्थेन उदात्तग्रहणेन ज्ञाप्यते । यदि गुणाः भेदकाः तर्हि, साक्षात् अनङादेशमेव उदात्तस्वरविशिष्टमुच्चारयेत् । तथाकृत्वा उदात्त इति पदाभिधानात् गुणाभेदकत्वमेव सेत्स्यति ।

ननु यदि गुणाः अभेदकाः तर्हि अनुदात्तादेः विधीयमानं कार्यं उदात्तादेः-स्वरितादेः शब्दस्यापि प्राप्नोति । यथा "अनुदात्तादेरञ्"[६] इति विहितः अञ् उदात्तादेः स्वरितादेः शब्दस्यापि प्राप्नोति, यच्च नेष्टम् । एवं अन्तोदात्तात् विहितं

“बह्वचोऽन्तोदात्तात् ठञ्”[७] इति ठञ् प्रत्ययरूपं कार्यम् अनुदात्तान्तस्य, स्वरितान्तस्य शब्दस्यापि प्राप्नोति इति चेदत्रोच्यते – आश्रीयमाणस्य गुणस्य भेदकत्वपक्षस्वीकाराददोषः । यः गुणः शब्देन अभिधीयते, सः गुणः सर्वदा भेदक एव भवति । यथा "शुक्लमालभेत" "कृष्णमालभेत" इत्यादि स्थले, यः शुक्ल – आलब्धव्ये, कृष्णमालभते न हि तेन यथोक्तं कृतं भवति । इत्थञ्च शब्देनोपादीयमानगुणादन्यत्र, गुणाः अभेदका एव इति कृतान्तः । अस्मिंश्च पक्षे उच्चरितेन आकारेण सर्वगुणविशिष्टः आकारः गृहीतः भवतीति तपरनिर्देशः अनावश्यकः ।

नन्वेवं तर्हि असंदेहार्थं तपरकरणं स्यात् । असति तकारे "आ ऐच् = ऐच्" इत्युच्यमाने सन्देहः जायते, यत् किमिमौ ऐचौ एव, अथवा आकारोऽपि अत्र अस्ति वा इति । यदि तकारः मध्ये पठ्यते तर्हि आकार-ऐकार-औकाराः इति सुस्पष्टं विज्ञायते । तस्मात् संदेहाभावार्थं तपरकरणम् इति चेन्न –

सर्वविधसंदेहानामपि निवारणार्थमेषा परिभाषा पठ्यते "व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्"[८] इति । अतः तया परिभाषया एव असत्यपि तकारे आकार-ऐकार-औकाराणां वृद्धिसंज्ञा प्रतिपाद्यते । अन्यत्रापि हि एवं जातीयकेषु संदेहेषु अनया परिभाषया एव परिहारः उक्तः । यथा "औतोऽम्शसोः"[९] इत्यत्रापि औतः इति पदे "आ ओतः" इति पदच्छेदं कृत्वा "ओतः अम्शसोः आत्वम्" इति सूत्रार्थो व्याख्यायते । अतः संदेहाभावार्थमपि तपरकरणमनपेक्षितमित्यायातम् ।

एवञ्च "वृद्धिरादैच्" इति सूत्रे आकारार्थं तपरकरणस्य अनावश्यकत्वात्, ऐजर्थं तपरकरणम् इत्येष सिद्धान्तः भाष्यकारैर्व्यवस्थापितः । ततश्च द्विमात्रिकयोः ऐकार-औकारयोरेव वृद्धिसंज्ञा यथा स्यात्, त्रिमात्र-चतुर्मात्रिकयोः वृद्धिसंज्ञा मा भूदित्येतदर्थं तपरकरणमिति भाष्ये सिद्धान्तितम् । अन्यथा खट्वा + इन्द्रः = खट्वेन्द्रः, खट्वा + ऐतिकायनः = खट्वैतिकायनः इत्यादौ आन्तर्यतः त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा अभूवन् । एतादृशविप्रतिपत्तिवारणाय तपरकरणं सूत्रे कृतम् । ततश्च ऐच् वर्णौ “तपरस्तत्कालस्य” इति सूत्रेण तत्कालानामेव ग्राहकौ भवतः । तस्मिन् सूत्रे यद्यपि तः परो यस्मात् सः तपरः इति बहुव्रीहिसमासाश्रयणे, ऐजर्थं तपरकरणमित्युपपादयितुं न शक्यते अथापि तात् परस्तपरः इति

पञ्चमीतत्पुरुषसमासाश्रयणे सर्वोऽप्यर्थः सेत्स्यति । इत्थं च "वृद्धिरादैच्" इति संज्ञासुत्रे "गुणाः अभेदकाः" इति पक्षमभ्युपगम्य आकारस्य तपरनिर्देश-अनावश्यकत्वं प्रतिपाद्य, ऐजर्थं तपरकरणमिति सिद्धान्तः शास्त्रे उपस्थापितः ।

ह्रस्वाकार- एकार- ओकाराणां गुणसंज्ञाविधायके "अदेङ्गुणः"[१०] इति शास्त्रेऽपि अदिति तपरकरणं श्रूयते । स च तपरनिर्देशः अकारार्थम्, एङर्थञ्च । त्रयाणामपि वर्णानाम् अण्त्वात्, असति तपरे "अणुदित्सवर्णस्य चाप्रत्ययः"[११] इत्यनेन सर्वेषामपि भेदानां ग्रहणे सिद्धे "तपरस्तत्कालस्य" इत्यनेन षण्णामेव भेदानां संज्ञाविधौ उपस्थितिर्यथा स्यादित्येतदर्थं तपरनिर्देशः भगवता कृतः । तत्र तपरशब्दे बहुव्रीहि-तत्पुरुषसमासयोः[१२] द्वयोरपि स्वीकारात् इष्टार्थसिद्धिः । तेन गङ्गा + उदकम् इत्यादौ स्थानिनोः आकार-उकारयोः त्रिमात्रिकत्वात्, तयोः स्थाने द्विमात्रिकः एकार एव आदेशत्वेन जायते, न तु मात्रासाम्यात् त्रिमात्रिकः एकारः ।

तपरघटितमपरं शास्त्रम् प्रगृह्यसंज्ञाविधायकं "ईदूदेद्द्विवचनं प्रगृह्यम्"[१३] इति । प्रथमाध्यायस्य प्रथमपादस्थेनानेन सूत्रेण दीर्घ-ईकारान्त, दीघ-ऊकारान्त, दीर्घ-एकारान्तद्विवचनप्रत्ययस्य प्रगृह्यसंज्ञा विधास्यते । हरी एतौ, विष्णू इमौ, पचेते इति इत्यादीनि यथाक्रममुदाहरणानि । संज्ञायाः अस्याः प्रयोजनम् "प्लुतप्रगृह्या अचि नित्यम्"[१४] इति प्रकृतिभावः । प्रकृतसूत्रे ईत् – ऊत् – एत् इति त्रिषु स्थलेषु तपरनिर्देशः दृश्यते । तत्र ईकार-ऊकारयोः माहेश्वरसुत्रे अपाठात्, "अणुदित्..." सूत्रस्य अप्रवृत्तिः, ताभ्यां सर्वसवर्णाग्रहणञ्च स्वतः सिध्यति । एकारस्त्वणिति कृत्वा प्लुतभेदानां अग्रहणार्थं तपरकरणं तदंशे सार्थकम् । ईकारोकारांशे तपरस्य किं प्रयोजनमिति जिज्ञासायामुच्यते – "तपरस्तत्कालस्य" इत्यनेन दीर्घप्रभेदानां उदात्तानुदात्तस्वरितानुनासिकाननुनासिकानां ग्रहणार्थं तयोस्तपरकरणम् इति । अन्यथा ईकार-ऊकाराभ्यां यद्गुणविशिष्टतयोच्चारणं कृतं तद्गुणविशिष्टस्यैकस्यैव प्रगृह्यत्वप्रसङ्गः । इष्यते च सा षण्णामपि, तस्मात् तपरत्वं कृत्वा तेषां संज्ञोपपादनं कर्तव्यम् ।

ननु यद्येवमुक्त्वा दीर्घाणामेव प्रगृह्यत्वं निरूप्यते, तर्ह्यतत्कालत्वात् प्लुतानां ईकारोकारैकाराणां प्रगृह्यत्वं नैव सेत्स्यति यच्चेप्सितमिति चेदत्रोच्यते – प्लुतस्यासिद्धात्वात् तत्कालादेव प्रगृह्यत्वसिद्धिः । अर्थात् अष्टके प्लुतविधायकानां

सर्वेषामपि सूत्राणां त्रिपाद्यां पाठात्, सपादसप्ताध्यायीस्थ-प्रगृह्यसंज्ञासूत्रदृष्ट्या तेषां "पूर्वत्रासिद्धम्"[१५] इत्यसिद्धत्वात्, तत्र स्थले तत्कालत्वात्[१६] सिध्यति प्रगृह्यसंज्ञा । अतो नास्ति दोषः ।

नन्वथापि प्लुतस्थले प्रगृह्यत्वं न भवति, "सिद्धः प्लुतः स्वरसन्धिषु" इति ज्ञापकाश्रयणात् । तथा हि – "प्लुतप्रगृह्या अचि नित्यम्" इति शास्त्रेण प्लुतानां प्रगृह्यसंज्ञकानां वर्णानां, अचि परे नित्यं प्रकृतिभावः विधीयते । विद्यमानस्यैव स्थानिनः कार्ययोगः उचितः[१७] । प्लुतस्तावदसिद्ध इत्यतः तस्य अविद्यमानत्वात् तस्य सपादसप्ताध्यायीस्थेन प्रकृतिभावविधायसूत्रेण कार्यविधानमसम्भवम् । तच्च ज्ञापकं – "प्रकृतिभावे कर्तव्ये प्लुतः सिद्ध" इति । ज्ञापकस्यास्य सामान्यापेक्षत्वात् प्रकृतिभावघटिते कृत्स्नस्वरसन्धिविषये प्लुतस्य सिद्धत्वं समाश्रियते । ज्ञापकस्यास्य सामान्यापेक्षत्वस्वीकारस्य प्रयोजनं तावत् "अतो रोरप्लुतादप्लुते"[१८] इत्युत्वविधायके सूत्रे अप्लुतादप्लुते इति पदद्वयाकरणरूपम् । किञ्च कार्यकालपक्षे[१९] "ईदूदेद्विवचनं प्रगृह्यम्" इति संज्ञासूत्रस्य, प्रकृतिभावविधिदेशस्थत्वात् तद्विषयेऽपि प्लुतस्य सिद्धत्वात् तत्कालत्वाभावात् प्रगृह्यत्वाप्रसङ्गः प्लुतस्थले, इति चेन्न –

"सिद्धः स्वरः प्लुतसन्धिषु" इति ज्ञापकस्य सिद्धान्ते अनाश्रयणात्, प्लुतस्य असिद्धत्वात् प्रगृह्यत्वसिद्धिः । ज्ञापितश्चायमंशः "प्लुतप्रगृह्या अचि नित्यम्" इति सूत्रेण, तत्र च "प्लुतभावी प्रकृत्या" इत्येवं व्याख्यान्तरं समाश्रित्य, असिद्धस्यापि प्लुतस्य प्रकृतिभावः क्रियते । किञ्च प्लुतस्य सिद्धत्वं यदि स्वीक्रियते तर्हि क्वचित्स्थलेषु दोषप्रसक्तिरपि जायते यथा - "अणोऽप्रगृह्यस्यानुनासिकः"[२०] इत्यादौ । प्रगृह्यसंज्ञारहितस्य अणः अनुनासिकविधानार्थमिदं सूत्रम् । यथा – बालँ, मधुँ इत्यादयः । परं अग्नी३ इत्यत्र प्लुतस्थले वस्तुतः अनुनासिकः नेष्यते । तत्र स्थले प्लुतस्य असिद्धत्वात्, तत्कालत्वात् "ईदूदेत्" इत्यनेन प्रगृह्यत्वात् अनुनासिकाभावः सिध्यति । यदि प्लुतः सिद्धः तर्हि तस्य अतत्कालत्वात् "ईदूदेत्" इत्यनेन प्रगृह्यत्वाभावे अनुनासिकः दुर्वारः स्यात्, यच्च नेष्टम् । तस्मात् सर्वथा प्लुतस्य असिद्धत्वमेवेष्टव्यम् । ततो प्रगृह्यत्वसिद्धिः ।

नन्वथाप्यत्र संशीतिर्भवति यत् – प्लुतस्य प्रगृह्यत्वसंज्ञया किम् प्राथ्यर्ते? यद्युच्येत प्रकृतिभाव इति तदसम्यक्, साक्षात् प्लुतमाश्रित्यैव प्रकृतिभावसिद्धेः । ततो

प्लुतस्य प्रगृह्यत्ववचनमनर्थकमिति चेन्न – "अप्लुतवदुपस्थिते"[२१] इत्यादौ प्लुताश्रप्रकृतिभावनिषिद्धे अपि, प्रगृह्याश्रयस्य प्रकृतिभावस्य विधानार्थं तस्यावश्यकत्वात् । तथा च अवैदिके इति शब्दे प्लुतस्य अप्लुतवद्भावः विधीयते "अप्लुतवदुपस्थिते" इति सूत्रेण । यथा सुश्लोक३ इति इत्यत्र "दूराद्धूते च"[२२] इत्यनेन ककारोत्तरवर्ति- अकारस्य प्लुतत्वे, प्रकृतसूत्रेण अप्लुतवद्भावस्यातिदेशात् प्रकृतिभावाभावे, आद्गुणे सुश्लोकेतीति रूपसिद्धिः । अतिदेशस्य वैकल्पिकत्वात् तदभावे प्लुताश्रितः प्रकृतिभावः – सुश्लोक३ इति । अप्लुत इत्युक्तेऽप्लुत एव विधीयेत, प्लुतश्च निषिध्येत । परम् अप्लुतवदुपस्थितेति सूत्रे वतिनिर्देशात् केवलं प्लुताश्रितः प्रकृतिभाव एव वार्यते, न तु कृतस्य प्लुतस्य निवृत्तिः । ततश्च अग्नी३ इति इत्यपरस्मिन्नुदाहरणे "गुरोऽरनृतोनन्त्यस्याप्येकैकस्य प्राचाम्"[२३] इत्यनेन प्लुते, प्रकृतसूत्रेण अप्लुतवद्भावस्यातिदेशात् प्लुतनिमित्तक - प्रकृतिभावास्याप्रवृत्तौ, सवर्णदीर्घः प्रसज्येत । परं प्लुतस्य असिद्धत्वमादाय ईदूदेदित्यादिना प्रगृह्यत्वे, तदाश्रिते च प्रकृतिभावे कृते, सवर्णदीर्घस्याप्रसक्तौ इष्टस्य अग्नी३ इतीति रूपस्य सिद्धिर्जायते । तस्मात् प्लुतस्य प्रगृह्यसंज्ञावश्यं वक्तव्या। सा च संज्ञा प्लुतस्यासिद्धत्वात् ईदूदेद्द्विवचनमित्यनेनैव सिध्यति । ततश्च सूत्रेऽस्मिन् तपरकरणं सवर्णग्रहणार्थमिति सुस्पष्टम् ।

अस्मिन्नेव प्रगृह्यसंज्ञाप्रकरणे "ओत्"[२४] इत्यपरं तपरघटितं सूत्रं सूत्रयामास भगवान् पाणिनिः । प्लुतस्य व्यावृत्त्यर्थं तत्र तपरकरणम् । तथा च केवलं दीर्घ-ओकारान्तनिपातानामेवानेन प्रगृह्यत्वं कथ्यते । यथा – आहो इति, उताहो इति ।

एवमेव प्रगृह्यत्वबोधके तार्त्तीयीके "ईदूतौ च सप्तम्यर्थे"[२५] इति सूत्रेऽपि तपरत्वं संदृश्यते, तच्च असंदेहार्थं, मुखसुखार्थं वा कृतम् । सप्तम्यर्थे पर्यवसन्नाः ईकारान्त-ऊकारान्तशब्दाः अनेन प्रगृह्यत्वं भजन्ते। वैदिकशब्दप्रयोगविषयकमिदं शास्त्रम्, लौकिके प्रयोगे सप्तम्यां ईकारान्त- ऊकारान्तशब्दयोरलाभात्। प्रकृतसूत्रव्याख्यावसरे "तपरकरणमसन्देहार्थम्" इति स्पष्टं प्राह काशिकाकारः[२६] । गुणान्तरभिन्नानां तुल्यकालानां ग्रहणार्थं तपरकरणमिति वक्तुं तु नैव शक्यते, गुणानामभेकत्वपक्षे सर्वेषां गुणानां ग्रहणसिद्धेः । भिन्नकालानां प्लुतभेदानां निवृत्त्यर्थमपि तपरकरणमनपेक्षितम्, ईकारोकारयोः अनण्त्वादणुदित्सूत्राप्रवृत्तौ

प्लुतभेदानामग्रहणात् । किञ्च सप्तम्यर्थवृत्ति- प्लुतान्ताः ईकारान्तोकारान्तशब्दाः नैवोपलभ्यन्त इति तपरकरणस्य सर्वथा प्रयोजनाभावात्, सन्ध्यभावसम्पादनद्वारा असंदेहार्थं तदिति वक्तव्यम् । यद्यपि सर्वविधसंदेहः "व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम्" इत्यनुसारं व्याख्यानतः एव वार्यते, अथापि मन्दमतीनां स्पष्टप्रतिपत्त्यर्थं तपरत्वमिति समाधेयम् ॥ इति शम् ॥

पादटिप्पण्यः -

1. पा. सू. 1/1/1
2. महाभाष्यम् 1/1/1
3. महाभाष्यम् १/१/१
4. महाभाष्यम् १/१/१
5. पा. सू. ७/१/७५
6. पा. सू. ४/२/४४
7. पा. सू. ४/३/६७
8. परिभाषेन्दुशेखरः – प. सं. १
9. पा. सू. ६/१/९३
10. पा. सू. १/१/२
11. पा. सू. १/१/६९
12. तः परो यस्मात् सः । तात् परः तपरः ।
13. पा. सू. १/१/११
14. पा. सू. ६/१/१२५
15. पा. सू. ८/२/१
16. दीर्घप्रभेदानामेव सत्त्वात् ।
17. सतो हि कार्यिणः कार्येण भवित्यव्यम् – भाष्यम् १/१/११ । कार्यी – स्थानी ।
18. पा. सू. ६/१/११३
19. कार्येण काल्यते स्वसन्निधिं प्राप्यत इति – कार्यकालपक्षः । संज्ञासूत्राणां-परिभाषासूत्राणां च विधिसूत्रप्रदेशेषु उपस्थितिः, ततः तेषां वाक्यार्थबोधः २०) न तु उपदेशदेशे – इत्यभिप्रायः कार्यकालपक्षस्य ॥
20. पा. सू. ८/४/५७
21. पा. सू. ६/१/१२९

22. पा. सू. ८/२/८४
23. पा. सू. ८/२/८६
24. पा. सू. १/१/१५
25. पा. सू. 1/1/१९
26. काशिका १/१/१९

सन्दर्भग्रन्थाः –

१) प्रौढमनोरमा-बृहच्छब्दरत्न-लघुशब्दरत्नसहिता प्रथमो भागः

२) लघुशब्देन्दुशेखरः, (पञ्चसन्ध्यन्तो भागः) – 'सुबोधिनी' व्याख्या सहितः, आचार्यः विश्वनाथ मिश्रः

३) व्याकरणमहाभाष्यम्, भाष्यप्रदीपोद्योतसमुल्लसितम्, श्री भार्गव शास्त्री जोषी,

४) शब्दकौस्तुभः (त्रयः भागाः), चौखम्बा संस्कृत प्रतिष्ठान

५) सिद्धान्तकौमुदी बालमनोरमा तत्त्वबोधिनी सहिता, मोतीलाल बनारसीदास पुस्तकालयः

६) सिद्धान्तकौमुदी - लक्ष्मीव्याख्यानम्

❋ ❋ ❋

हरिभास्कर-अग्निहोत्रिकृत-परिभाषाभास्करदिशा यदागमपरिभाषाविमर्शः

प्रीतम बेरा

प्रबन्धसारः

परितः सर्वतो भाष्यतेऽनयेति परिभाषा। परिपूर्वकाद् भाष्-धातोः घञि ततष्टापि परिभाषाशब्दो निष्पद्यते। अनियमलेशमसहमानेऽस्मिन्शास्त्रे उत्पन्नानियमविमोका हि परिभाषाः। परिभाषाग्रन्थेषु मूर्धन्यस्थानम् अवरुह्य विराजते आचार्यनागेशविरचितः परिभाषेन्दुशेखरः। परन्तु तदितरेऽपि केचन ग्रन्थाः स्ववैशिष्ट्येन विदुषां दृष्टीश्चरीकृष्यन्ते। तेषु आन्यतम्यं भजते आचार्यहरिभास्कर-अग्निहोत्रिविरचितः परिभाषाभास्करः। तद्ग्रन्थदिशा यदागमपरिभाषाया विमर्शः प्रकृतप्रबन्धे उपस्थाप्यते। परिभाषाभास्करे प्रकृतपरिभाषास्वरूपं तावत् "आगमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते" इत्याकारिका।

परिभाषार्थः, प्रयोजनम्, विचारः, ज्ञापकम्, समीक्षा चेति कोटिपञ्चकयुतो वर्ततेऽसौ प्रबन्धः।तत्र परिभाषार्थकोटौ परिभाषाया अर्थः सरलरीत्या लिखितः, प्रयोजनकोटौ ग्रन्थकृत्प्रदत्तोदाहणमुल्लिखितम्, विचारकोटौ उदाहरणस्य साङ्गत्यं, हरिभास्करकृतविचारः, परिभाषाया ज्ञापकानि च प्रदर्शितानि। एवञ्च समीक्षाभिधकोटौ तावत् ग्रन्थकृत्कृतविचारस्य युक्तताप्रदर्शनम्, ग्रन्थान्तरापेक्षया प्रकृतग्रन्थे परिभाषास्वरूपे ज्ञापके च स्थितस्य भेदस्य प्रदर्शनं च यथामति विहितं प्रबन्धोऽस्मिन्। मनोरमाकारेण धुड्विधौ धुगकरणे परिभाषाया हेतुत्वममन्यत। तत्प्रसङ्गे एव स्वग्रन्थे मनोरमाकारेण अत एव वक्ष्यमाणस्तुगिहैव न कृतः इत्याकारिका पङ्क्तिरुक्ता। एतत्पङ्क्तिस्थस्य एवकारस्य अयोगव्यवच्छेदार्थत्वं प्रतिपादितं परिभाषाभास्करकारेण हरिभास्करकारेण। तेन च चयो द्वितीया...इत्यादिवार्तिकप्राप्त-थकारापत्तिरूपदोषस्य तुगागमाकरणे हेतुत्वं निराकृतम्। प्रसङ्गेऽस्मिन् प्रकृतशोधप्रबन्धे एवकारस्य त्रैविध्यम् उदाहरणोल्लेखपुरःसरम् आलोचितम्। अन्ते च एवकारस्य अप्यर्थतापि प्रतिपादिता। एवमेव प्रकृतपरिभाषाबलादेव यासुडागमस्य उदात्तत्वे लब्धे पुनः सूत्रेण तद्विधानं

कुतः इत्येवमाशङ्कायां तत्समाधानं विस्तरेण प्रतिपादितम् प्रबन्धे।

एवं हरिभास्कराचार्येण प्रोक्तानि प्रकृतपरिभाषाया त्रीणि ज्ञापकानि सविस्तरं व्याख्यातम्। तत्र नागेशमते च ज्ञापकविषये को भेदः इत्यपि आलोचितं तत्र। परिभाषेन्दुशेखरे परिभाषास्वरूपे भेददर्शनात् कः पाठः युक्ततरः इत्यस्मिन् विषये स्वमतिः प्रकटिता मयेति शिवम्।

कूटशब्दाः – परिभाषा, आगमः, आगमी, ज्ञापकम्, अयोगव्यवच्छेदः।

प्रस्तावना

परिदृश्यमानमखिलशास्त्रवाङ्मयमिदं शब्दशास्त्राधीनम्। ऋते शब्दशास्त्रं निखिलं विश्वं घनतमसि निमज्जेत्। सत्स्वपि ऐन्द्रादिषु[1] व्याकरणेषु सर्वतन्त्रस्वतन्त्रं पाणिनीयतन्त्रं स्वमहिम्ना राराज्यते। त्रिमुनि व्याकरणमिदं सर्वशास्त्रोपकारकत्वेन निखिलैरपि विद्वत्तल्लजैराद्रियते। तथाहि आभाणकम् –

"काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्।" इति।

वेदरक्षायै प्रवृत्तमदः शास्त्रं वेदाङ्गेषु प्राधान्यं भजन्निखिलशास्त्रोपकारकतामगात्। तस्मिंश्च सर्वशास्त्रोपकारके पाणिनीयशास्त्रे सन्ति कठोरतपःसमाः श्रमा विदुषाम्। तत्तपःफलकुसुमैर्मण्डितेयं व्याकरणस्रङ् नितान्तं शोभते संस्कृतमातुः शिरसि। ताञ्च स्रजं गुम्फितृषु विद्वद्वरेषु केचन प्रसिद्धिमिताः ,अपरे च कालप्रभावाद् विलीनाः समजायन्त। तादृशेनैव अप्रसिद्धेन केनचित् हरिभास्कराख्येन विदुषा रचितो ग्रन्थो हि परिभाषाभास्कर इति। परिभाषाणामुपरि लिखितेऽस्मिन् ग्रन्थे द्वात्रिंशदधिकशतं परिभाषा विलसन्ति। परिभाषेन्दुशेखरापेक्षया बहवो नूत्नविषयाः परिभाषाव्याख्यानावसरे ग्रन्थकारेणालोचिताः। इत्थं ग्रन्थकारकृतं परिभाषाणां मौलिकव्याख्यानं विदुषो दृष्टीश्चरीकृष्यते। तस्मिन्नेव परिभाषाभास्कराख्ये ग्रन्थे विद्यमाना " आगमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते" इति परिभाषा यथामति विचार्यते प्रकृतप्रबन्धे। तत्र परिभाषार्थः, प्रयोजनम्, विचारः, ज्ञापकम्, समीक्षा चेति कोटिपञ्चकयुतो वर्ततेऽसौ प्रबन्धः।

परिभाषार्थः

आगमाः आगमिगुणीभूता भवन्ति अर्थाद् आगमिन अवयवा जायन्ते, अपि च आगमिबोधकशब्देन आगमविशिष्टं गृह्यते।

प्रयोजनम्

सर्वेषाम् इत्यत्र "बहुवचने झल्येत्"[2](७/३/१०३) इति एत्वम्।

विचारः

परिभाषायां तच्छब्देन आगमी बोध्यते। तेन तद्गुणीभूता इत्यस्यार्थस्तावद् आगमिगुणीभूताः इति, किञ्च तद्ग्रहणेन इत्यस्यार्थ आगमिग्रहणेन इति। गुणशब्दः प्रकृते अवयववाचको वर्तते। तेन आगमिगुणीभूताः इत्यस्य तात्पर्यं हि आगमिन अवयवा इति। तद्ग्रहणेनेत्यत्र ग्रहणशब्दः कर्तरि ल्युडन्तो[3] वर्तते। एवम् आगमिग्रहणेन इत्यस्यार्थो हि आगमिग्राहकेण अर्थाद् आगमिबोधकशब्देन इति। एवं तद्ग्रहणेन गृह्यन्ते इत्यस्यार्थो भवति आगमिबोधकशब्देन आगमविशिष्टं गृह्यते इति। अस्य तात्पर्यमेवं ग्राह्यं यद् आगमिगतधर्मा आगमविशिष्टे आरोप्यन्ते इति। यमुद्दिश्य आगमो विधीयते स आगम्यभिधीयते। यथा " आमि सर्वनाम्नः सुट्"[4](अष्टा.७/१/५२) इत्यनेन आम्-प्रत्ययमुद्दिश्य सुडागमो विधीयते। अतोऽत्र सुड् आगमः, आम् च आगमी। एवं प्रकृतपरिभाषानुसारं सुडागम आम्-प्रत्ययस्याववयो सञ्जायते। तेन आमो ग्रहणे सति 'साम्' इति सुड्विशिष्टस्य ग्रहणं भवति। अतोऽत्र आमो बहुवचनत्वधर्मस्य साम् इति आगमविशिष्टे आरोपे सति साम्-इत्यस्यापि बहुवचनत्वम्। तथा सति सर्व साम् इत्यवस्थायां साम्-इत्यस्य झलादिबहुवचनत्वेन सर्व-इत्यकारस्यैत्वं सिध्यति।

धुड्विधौ धुगकरणे परिभाषाया हेतुत्वम् - आचार्यो हरिभास्करः "डः सि धुट्"[5](अष्टा.८/३/२९) इति सूत्रस्थाने डः सि धुक् इति न्यासान्तराकरणे अस्याः परिभाषायाः कारणत्वमस्तीति प्रादर्शयत्। उक्तं च तेन "अत एव डः सि धुक् इति नाकारि" इति। अत्रायमाशयः डः सि धुट् इति सूत्रेण डकारात् परस्य सकारस्य धुडागमो विधीयते। तथाहि षड् सन्तः इत्यत्र सकारस्य धुडागमे टित्त्वाद् आद्यावयवे षड् ध् सन्तः इति स्थितौ "ष्टुना ष्टुः"(अष्टा.८/४/४१) इत्यनेन तवर्गीयस्य धकारस्य टवर्गीयेण डकारेण योगात् ष्टुत्वे प्राप्ते डकारस्य पदान्तत्वेन "न पदान्ताट्टोरनाम्"(अष्टा.८/४/४२) इत्यनेन ष्टुत्वनिषेधो जायते। ततः " खरि

च"(अष्टा.८/४/५५) इति धकारस्य चर्त्वे तकारे, डकारस्यापि चर्त्वे टकारे च षट्त्सन्तः इति रूपम्। अत्रैवं शङ्क्यते यत् प्रकृते "डः सि धुट्" इत्यत्र डः इति पदे पञ्चमीसत्त्वाद् डकारं निमित्तीकृत्य सकारस्य धुट्-इत्यागमो विधीयते। तदकृत्वा डः सि धुक् इति न्यासे कृते डः इत्यत्र षष्ठीस्वीकारेण डकारस्य आगमित्वं, सि इत्यत्र सप्तमीसत्त्वेन च सकारस्य परनिमित्तत्वं भवेत्। तदा सकारं निमित्तीकृत्य डकारस्य धुग् विधीयेत। तथाहि षड् सन्तः इत्यवस्थायां डकारस्य धुगागमे कित्त्वाद् अन्तावयवे षड् ध् सन्तः इति स्थितौ डकारधकारयोः चर्त्वे षट्त्सन्तः इत्येवं समानं रूपं सञ्जायते। अतो विनिगमनाभावात् कित्पक्षोऽपि शक्योऽङ्गीकर्तुमिति चेन्न कित्पक्षे डकारस्यागमित्वेन धुगागमो डकारावयवो जायते प्रकृतपरिभाषाबलात्। तथा सति षड् ध् सन्तः इत्यवस्थायां डकारावयवत्वेन धकारस्य पदान्तत्वं भवेत्। धकारस्य पदान्तत्वे तु तत्पूर्वस्य डकारस्य अपदान्तत्वात् पदान्ताट्टोः परस्यैव ष्टुत्वनिषेधात् "न पदान्ताट्टोरनाम्" इति ष्टुत्वनिषेधाप्राप्तिः प्रकृते। निषेधाभावाच्च तवर्गीयस्य धकारस्य टवर्गीयेण डकारेण योगाद् अनिष्टं ष्टुत्वं दुर्वारं स्यात्। तस्मात् टित्पक्ष एव आश्रेयः। पक्षेऽस्मिन् सकारस्यागमित्वेन आगमो धकारः सकारावययो भवति, न तु डकारावयवः। तेन डकारस्य पदान्तत्वाक्षुण्णत्वेन ष्टुत्वनिषेधो भवत्येव।

प्रौढमनोरमामतम् - डकारस्य किदागमकरणेन आगमस्य डकारावयत्वेन ष्टुत्वनिषेधाभावरूपदोषसत्त्वात् प्रौढमनोरमायां "डः सि धुट्" इति सूत्रव्याख्यानावसरे "अत एव वक्ष्यमाणस्तुगिहैव न कृतः"[6] इत्युक्तम्। अत्राशयस्तावद् डकारस्य धुगागमकरणेन यो दोषः प्रदर्शितः, स एव दोषो डकारस्य तुगागमकरणेऽपि प्रसज्येत। तस्मात् "शि तुक्"[7] (अष्टा.८/३/३१) इत्यत्र वक्ष्यमाणस्तुग् अत्र कर्तुं न शक्यते इति प्रौठमनोरमाशयः। परन्तु अत्र तुगागमाकरणे भिन्नं कारणम् आहुः केचित्। तथाहि तेषां मते तुगागमे कृते षड् त् सन्तः इत्यवस्थायां "चयोः द्वितीयाः शरि पौष्करसादेरिति वाच्यम्"(वा.) इति वार्तिकेन तकारस्य थकारापत्तिर्दोषः। एतच्च कारणं तुगागमाकरणे इति केषाञ्चिन्नयः। धुगागमे तु धकारस्य चर्त्वे तकारे "खरि च" इति विहितचर्त्वस्य वार्तिकदृष्ट्या असिद्धत्वेन न थकारादेशप्रसङ्गः। परन्तु तुगकरणे भिन्नकारणं कथयतां तेषां मतमयुक्तम् "अत एव" इत्यत्र एवकारस्य अयोगव्यवच्छेदार्थकत्वादिति ग्रन्थकाराशयः।

एवकारत्रैविध्यम् - एवकारस्तावत् त्रिविधः अयोगव्यवच्छेदार्थः, अन्ययोगव्यवच्छेदार्थः, अत्यन्तायोगव्यवच्छेदार्थश्च। विशेष्ये विशेषणस्य योऽयोगः अभावः तस्य व्यवच्छेदः अयोगव्यवच्छेद इत्यभिधीयते। विशेषणसंगत एवकारो हि अयोगव्यवच्छेदार्थो भवति। यथा शङ्खः पाण्डुर एव इत्यत्र शङ्खः पाण्डुरो न इत्याकारकस्याभावस्य व्यवच्छेदः क्रियते एवकारेण, तस्मादत्र एवकारः अयोगव्यवच्छेदार्थो वर्तते। अयोगव्यवच्छेदत्वं हि विशेषणे विशेष्यतावच्छेदकसमानाधिकरणाभावाप्रतियोगित्वम्।[8] प्रकृते शङ्खो विशेष्यः पाण्डुरत्वं हि विशेषणम्। विशेष्यतावच्छेदकं हि शङ्खत्वम्। शङ्खत्वसमानाधिकरणोऽत्यन्ताभावो घटाद्यभावः, तादृशाभावस्य प्रतियोगी घटादिः, अप्रतियोगि च पाण्डुरत्वम्, तस्य शङ्खे सत्त्वात्। अतः विशेष्यतावच्छेदकशङ्खत्वसमानाधिकरणाभावाप्रतियोगिपाण्डुरत्ववान् शङ्खः इत्यन्वयबोधः प्रकृते।

एवं विशेष्यसंगत एवकारः अन्ययोगव्यवच्छेदार्थो भवति। विशेष्येतरस्मिन् कस्मिंश्चित् पदार्थे विशेषणपदार्थस्य यो योगः सम्बन्धः, तस्य व्यवच्छेदोऽन्ययोगव्यवच्छेद इत्यभिधीयते। यथा पार्थ एव धनुर्धर इत्यादौ। प्रकृते धनुर्धरपदेन प्रशस्तधनुर्धरत्वं विवक्षितम्। एवं पार्थाद् इतरस्मिन् युधिष्ठिरादौ प्रशस्तधनुर्धरत्वस्य व्यवच्छेदः क्रियते एवकारेण। अर्थात् पार्थभिन्नोऽन्यः कोऽपि प्रशस्तधनुर्धरो नास्तीति तात्पर्यमत्र। एवं विशेषणे विशेष्यान्यवृत्त्यभावप्रतियोगित्वम् अन्ययोगव्यवच्छेदत्वम्।[9] प्रकृते पार्थो विशेष्यः, तदन्यो युधिष्ठिरादिः, तद्वृत्त्यभावः प्रशस्तधनुर्धरत्वाभावः, तत्प्रतियोगि प्रशस्तधनुर्धरत्वम्। एवं पार्थरूपविशेष्यान्ययुधिष्ठिरवृत्त्यभावप्रतियोगिधनुर्धरत्ववान् पार्थः इत्यन्वयबोधः प्रकृते।

क्रियासंगत एवकारोऽत्यन्तायोगव्यवच्छेदार्थो भवति। यथा नीलं सरोजं भवत्येवेति। अत्यन्तायोगव्यवच्छेदत्वं हि उद्देश्यताव्यवच्छेदकव्यापकाभावा-प्रतियोगित्वम्। अत्रोदाहरणे सरोजमुद्दिश्य नीलत्वविधानाद् उद्देश्यं सरोजम्, उद्देश्यतावच्छेदकं च सरोजत्वम्। सरोजत्वव्यापकः अत्यन्ताभावः घटाद्यभावः, न तु नीलाभेदाभावः कस्मिंश्चित्सरोजे नीलाभेदस्यापि सत्त्वात्। तादृशात्यन्ताभावा-

प्रतियोगित्वं नीलाभेदे वर्तते इति सरोजत्वव्यापकात्यन्ताभावाप्रतियोगिनीला-भेदवत्सरोजवम् इति बोधः प्रकृते जायते। इत्थम् एवकारत्रैविध्यं यथामति निर्वर्ण्य प्रकृतमनुस्त्रियते।

मनोरमापङ्क्तिस्थ-एककारतात्पर्यपर्यालोचनम् - मनोरमापङ्क्तौ अत एव इत्यस्य तात्पर्यं हि ष्टुत्वनिषेधाभावापत्तेरेव इति। अत्र एवकारोऽयोगव्यवच्छेदार्थः। तेन 'तुगकरणे ष्टुत्वनिषेधाभावापत्तिः कारणं न' इत्याकारकस्य अभावस्य व्यवच्छेदः क्रियतेऽत्र एवकारेण। एवम् एवकारबलात् निष्कर्षो लभ्यते यत् तुगकरणे ष्टुत्वनिषेधाभावापत्तिः कारणं न तु चयो द्वितीया...इत्यादि द्वितीयादेशापत्तिरिति। तस्मात् प्रकृते एवकारस्यायोगव्यवच्छेदार्थस्वीकारेण द्वितीयादेशापत्तिपक्षो निरस्यते। शिरोमणिमते एवकारस्य अन्ययोगव्यवच्छेदमात्रार्थत्वम्। परन्तु दण्डेनैव घट इत्यादौ अन्ययोगव्यवच्छेदार्थस्यासम्भवात् अयोगव्यवच्छेदस्यापि एवकारार्थत्वमस्त्येव इति प्राञ्चः। दण्डेनैव घटः इत्यत्र एवकारस्यान्ययोग-व्यवच्छेदार्थत्वे अङ्गीक्रियमाणे दण्डभिन्ने मृदादौ घटकारणत्वस्य व्यवच्छेदः स्यात्। परन्तु मृदादेरपि घटकारणत्वसत्त्वात् प्रकृते एवकारस्य अन्ययोगव्यवच्छेदार्थत्वम-सम्भवम्। तेनात्र अयोगव्यवच्छेदार्थ एवकारः स्वीकार्य एव। एवं प्रौठमनारमास्थपङ्क्तौ विद्यमानस्य एवकारस्य अयोगव्यवच्छेदार्थत्वे न कश्चिद्दोषः। अथवा अन्ययोगव्यवच्छेदार्थोऽपि एवकारस्तत्राङ्गीकर्तुं शक्य इति ग्रन्थकारः पक्षान्तरमुपस्थापयति। एवं तत्र ष्टुत्वनिषेधे तुगकरणहेतुत्वान्ययोगव्यवच्छेदः अङ्गीकार्यः। अथवा अत एव इत्यादौ एवकारस्य अप्यर्थो वर्तते इति तृतीयः पक्षः। तेन तत्र तुगकरणे ष्टुत्वनिषेधाभावापत्तिरपि हेतुः इत्येवं तात्पर्यं ग्राह्यम्। तथा सति तुगकरणे हेत्वन्तरसत्त्वेऽप्यदोषः। एवंरूपेण एवकारस्याप्यर्थत्वस्वीकारे तुगकरणे ष्टुत्वनिषेधाभावापत्तिर्द्वितीयादेशापत्तिश्चेति हेतुद्वयम् अङ्गीकर्तुं शक्यम्। एकस्य कार्यस्य उपायनानात्वे न दोषः। तथाहि न्यायः – " उपायस्योपायान्तरादूषकत्वमि"ति। आचार्यभर्तृहरिरपि वाक्यपदीये आह – "उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः"[10] इति। उपायस्य अर्थात् साध्यस्य ज्ञानार्थं उपाया अनिश्चिताः सन्ति। अर्थात् एकस्य साध्यस्य नानोपाया भवितुमर्हन्तीति तात्पर्यम्।

एवककारस्य अप्यर्थत्वस्वीकारः - एवम् एवकास्याप्यर्थत्वस्वीकारात् "न सम्प्रसारणे सम्प्रसारणम्"(अष्टा.६/१/३७) इति सूत्रे "अत एव ज्ञापकात् परस्य यणः सम्प्रसारणम्" इति दीक्षितपङ्क्तिस्थ एवकारः सङ्गच्छते। तथाहि युवन्-शब्दात् शसि " श्वयुवमघोनामतद्धिते"(अष्टा.६/४/१३३) इति सूत्रेण युवन्-शब्दस्य सम्प्रसारणं प्राप्नोति। युवन्-शब्दे य्-व्-इत्यनयोरुभयोरपि सम्प्रसारणे सम्भवे कतरस्य सम्प्रसारणं भवेदित्याकाङ्क्षायामुच्यते " न सम्प्रसारणे सम्प्रसारणम्" इति सूत्राज्ज्ञापकात् परस्य यणः पूर्वं सम्प्रसारणमिति। तज्ज्ञापकत्वं कथमिति चेत् युवन् शस् इत्यवस्थायां वकारस्य सम्प्रसारणे "सम्प्रसारणाच्च"(अष्टा.६/१/१०८) इति पूर्वरूपे च कृते यु उ न् अस् इत्येवंस्थितौ यकारस्यापि पुनः सम्प्रसारणे प्राप्ते "न सम्प्रसारणे सम्प्रसारणम्" इति निषेधात् सवर्णदीर्घे प्रक्रियायां यूनः इति रूपम्। परन्तु अत्र युवन् शस् इत्यवस्थायाम् आदौ यकारस्य सम्प्रसारणे सति इवन् शस् इत्येवंस्थितौ वकारस्य सम्प्रासरणं दुर्वारं स्यात् वकारानन्तरं सम्प्रसारणाभावात् न सम्प्रसारणे सम्प्रसारणम् इति सम्प्रसारणनिषेधाप्रवृत्तेः। एवं पूर्वस्य यणः पूर्वं सम्प्रसारणे सम्प्रसारणनिषेधस्य व्यर्थतापत्तौ निषेधोऽसौ व्यर्थीभूय ज्ञापकतामेति। एतद्व्याख्यानायैव भट्टोजिदीक्षितः न सम्प्रसारणे सम्प्रसारणम् इति सूत्रव्याख्यानावसरे आह "अत एव ज्ञापकात् परस्य यणः सम्प्रसारणम्" इति। पङ्क्तावस्यां प्रयुक्तस्य एवशब्दस्य हि अप्यर्थत्वं स्वीक्रियते। तदा पङ्क्तेस्तात्पर्यं लभ्यते यत् परस्य यणः पूर्वं सम्प्रासरणे सम्प्रसारणनिषेधरूपज्ञापकस्यापि हेतुत्वमिति। एवं सति परस्य यणः पूर्वं सम्प्रसारणे शब्दपरविप्रतिषेधस्यापि हेतुत्वमङ्गीकर्तुं शक्यम्। इत्थं शब्दपरविप्रतिषेधेनापि परस्य यणः पूर्वं सम्प्रसारणमिति वक्तुं शक्यम्। तच्च दीक्षितपङ्क्तिस्थैवकारस्य अप्यर्थत्वस्वीकारेण सङ्गच्छते।

यासुडागमस्य उदात्तत्वविधौ शङ्का परिहारश्च - परिभाषयानया आगमिगतधर्म आगमविशिष्टे आरोप्यत इति प्रतिपादितम्। परन्तु भूयादित्यादौ भूधातोराशीर्लिङि तिपि अनुबन्धलोपे प्रत्ययेकारलोपे प्रत्ययस्य यासुडागमे च कृते भू यात् इत्येवंस्थितौ " आद्युदात्तश्च"(अष्टा.३/१/३) इति सूत्रबलात् प्रत्ययस्यादिस्वरस्य उदात्तत्वविधानात् प्रकृतपरिभाषानुसारं यात्-इति आगमविशिष्टस्यैव प्रत्ययत्वात्, तदादिस्वरस्याकारस्योदात्तत्वे लब्धे पुनः "यासुट्

परस्मैपदेषूदात्तो ङिच्च"(अष्टा.३/४/१०३) इति सूत्रेण यासुट उदात्तत्वविधानं किमर्थमिति प्रश्नः। तत्समाधानं यद् यासुट उदात्तत्वविधानेन इदं ज्ञाप्यते यद् यासुडितरे सर्वे आगमा अनुदात्ता इति। केषाञ्चन मते एतज्ज्ञापनफलं हि 'तस्यां सुपर्णा वृषणा' इत्यादौ स्याडागमस्यानुदात्तत्वाद् विभक्तस्वरबाधनम्। तथाहि प्रकृते तस्यामित्यत्र तच्छब्दाद् ङौ ङेरामादेशे स्याडागमे च कृते पूर्वोक्तज्ञापनात् स्याडागमस्यानुदात्तत्वं भवति। तत्र च "सावेकाचस्तृतीयादिर्विभक्तिः" (अष्टा.६/१/१६८) इति सूत्रेण स्याडागमस्य उदात्तत्वं प्राप्नोति। तत्र स्याडागमस्य ज्ञापकसिद्धेन अनुदात्तत्वेन सूत्रप्राप्तस्य विभक्तिस्वरस्य बाधो जायते इति केषाञ्चिन्मतम्। अन्येषां मते तावत् प्रकृते तच्छब्दस्य प्रथमैकवचने अवर्णान्तत्वेन "न गोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यः"(अष्टा.६/१/१८२) इति सूत्रेण "सावेकाचस्तृतीयादिर्विभक्तिः" इति सूत्रप्राप्तो विभक्तिस्वरो निषिध्यते, न त्वत्र आगमानुदात्तत्वेन विभक्तिस्वबाधनम्। वस्तुतोऽत्र स्याडागमस्यानुदात्तत्वेन विभक्तिस्वरस्य बाधे सत्यपि न काचित्क्षतिर्जायते। यतो हि तच्छब्दाद् ङौ ङेरामादेशे स्याडागमे च कृते 'त स्या आम्' इत्यवस्थायां स्या-इत्याकारस्य ज्ञापकसिद्धमनुदात्तत्वम्, आम्-इत्याकारस्य " आद्युदात्तश्च"(३/१/३) इत्युदात्तत्वम्। तत्र "अकः सवर्णे दीर्घः"(६/१/१०१) इति सूत्रेण आकारयोः स्थाने आकारैकादेशे "एकादेश उदात्तेनोदात्तः"(८/२/५) इति सूत्रबलाद् एकादेशभूतस्याकारस्य उदात्तत्वमेव भवति। परन्तु स्थलेऽस्मिन् आगमानुदात्तत्वेन विभक्तिस्वरस्य बाधे क्षत्यभावदर्शनेनापि परिभाषाभास्करकारनये तु आगमानुदात्तेन विभक्तिस्वरबाधो न भवतीति बोध्यम्। अत एव विभक्तिस्वरबाधनमतमुक्त्वा 'इति केचित्' इत्येवं प्रतिपादितम्।

परिभाषाज्ञापकम्

अस्याः परिभाषाया ज्ञापकत्रयं प्रदर्शितं ग्रन्थकारेण। तत्र "णेरनिटि"[11] (अष्टा.६/४/५१) इति सूत्रे अनिड्ग्रहणं परिभाषामिमां ज्ञापयतीति केषाञ्चिन्नयः। तथाहि "णेरनिटि" इति सूत्रेण कार्यते इत्यादौ अनिडादावार्धधातुके परे णिच्प्रत्ययस्य लोपो विधीयते। कारयिता इत्यादौ इडादावार्धधातुके परे यथा णिलोपो न स्यादित्येतदर्थं सूत्रे अनिड्ग्रहणम्। परन्तु सूत्रे अनिड्ग्रहणाभावेऽपि कारयिता इत्यादौ

कारि इता इत्यवस्थायाम् ता-इत्यार्धधातुकस्य परत्वाभावाद्, इटः परत्वेऽपि तस्यार्धधातुकत्वाभावाद् णिलोपस्य प्राप्तिरेव नास्तीति अनिङ्ग्रहणस्य व्यर्थतापत्तिः। तच्च अनिङ्ग्रहणं व्यर्थीभूय प्रकृतपरिभाषां ज्ञापयतीति केषाञ्चिदाशयः। ज्ञापितायां च परिभाषायां कारि इता इत्येवंस्थितौ आगमविशिष्टस्यार्धधातुकत्वाद्, आर्धधातुकस्य परत्वेन सत्त्वाद् णिलोपे प्राप्ते, तद्वारणाय कृतम् अनिङ्ग्रहणं सार्थकतामेति।

अन्येषां मते तु " नेटि"[1 2] (अष्टा.७/२/४) इति सूत्रेण विहितस्य वृद्धिनिषेधस्य परिभाषाज्ञापकत्वम्। तथाहि "नेटि" इति सूत्रेण अदेवीत् इत्यादौ "वदव्रजहलन्तस्याचः"[13](अष्टा.७/२/३) इति सूत्रप्राप्तवृद्धेर्निषेधो विधीयते। परन्तु सूत्राभावेऽपि अदेवीत् इत्यादौ दिव्-धातोर्लुङि अडागमे तिपि सिचि सिच इटि तिप ईटि च कृते अदेव् इस् ईत् इत्यवस्थायाम् अदेव्-इति हलन्ताङ्गात् परम् इटः सत्त्वेन सिजभावाद् "वदव्रजहलन्तस्याचः" इति वृद्धेः प्राप्तिरेव नास्ति, सिचि परे तद्विधानात्। तथा सति वृद्धेः प्राप्त्यभावे "नेटि" इति निषेधस्य व्यर्थापत्तिः। स च निषेधो व्यर्थीभूय परिभाषामिमां ज्ञापयतीति अन्येषामाशयः। ज्ञापितायां च परिभाषायां आगमविशिष्टस्य इस्-इत्यस्य सिच्त्वेन सिचः परत्वलाभाद् वृद्धौ प्राप्तायां तन्निषेधाय कृतं "नेटि" इति सूत्रं सार्थकतामेति।

अपरेषां मते तु "पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्"(अष्टा.१/१/३४) इति सूत्रस्थः अधराणि इति निर्देशः प्रकृतपरिभाषां ज्ञापयति। तथाहि अधरशब्दाज् जसि जसः श्यादेशे अधरशब्दस्य "नपुंसकस्य झलचः"(अष्टा.७/१/७२) इति नुमागमे अधरन् इ इति स्थिते "सर्वनामस्थाने चासम्बुद्धौ"(अष्टा.६/४/८) इति सूत्रेण सर्वनामस्थाने परे अङ्गस्योपधावृद्धिः कर्तव्या। परन्तु " सर्वनामस्थाने चासम्बुद्धौ" इति सूत्रेण नान्तस्याङ्गस्योपाधाया वृद्धिः क्रियते। प्रकृते तु अधर-इत्यस्य अङ्गत्वेन, तस्य च नान्तत्वाभावाद् उपधावृद्धेरप्राप्तिः। एवं स्थितौ उपधावृद्ध्यभावे भगवता पाणिनिना कृतः अधाराणि इति निर्देशोऽनुपन्नः सन् प्रकृतपरिभाषां ज्ञापयतीत्यपरे आहुः। ज्ञापितायां च परिभाषायां आगमभूतस्य नकारस्याधरशब्दावयवत्वम्। तदा अधरन्-इति आगमविशिष्टस्याङ्गत्वेन नान्ताङ्गत्वलाभाद् उपधावृद्धौ सत्याम् अधराणि इति रूपं सिध्यति।

उपसंहारः

आचार्यो हरिभास्करः परिभाषाभास्करे प्रकृतपरिभाषाया ज्ञापकत्रयं प्रादर्शयत्। तानि हि "णेरनिटि"(अष्टा. ६/४/५१) इत्यत्र अनिङ्ग्रहणम्, "नेटि"(अष्टा.७/२/४) इति वृद्धिनिषेधः, पूर्वपरावर...इत्यादिसूत्रे अधराणि इति निर्देशश्च। परन्तु आचार्यनागेशेन लोकन्यायसिद्धत्वम् अस्या अङ्गीकृतम्। लोके एवं दृश्यते यत् कस्यचित् पुरुषस्याङ्गाधिक्ये सति अधिकाङ्गविशिष्ट एव तत्पुरुषग्रहणेन गृह्यते। तद्वद् आगमविशिष्टस्यैव आगमिग्रहणेन ग्रहणमित्येवं लोकसिद्धेयं परिभाषा। उक्तं हि परिभाषेन्दुशेखरे "लोकेऽपि देवदत्तस्याङ्गाधिक्ये तद्विशिष्टस्यैव देवदत्तग्रहणेन ग्रहणं दृश्यते"[14] इति। तत्र च परिभाषाफलरूपेण "णेरनिटि", "नेटि" इत्यादीनां चारितार्थ्यं प्रदर्शितम्।

परिभाषेन्दुशेखरात् परिभाषास्वरूपमपि भिद्यते परिभाषाभास्करे। तथाहि परिभाषेन्दुशेखरे परिभाषास्वरूपं तावत् "यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते"(प.शे.११) इति। प्रकृतग्रन्थे परिभाषस्वरूपं हि "आगमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते"(प.भा.४) इति। एवं प्रकृतग्रन्थे यच्छब्दो न परिभाषाघटको वर्तते। परन्तु यत्तच्छब्दयोः सापेक्षत्वात् तच्छब्दसत्त्वे तच्छब्दोत्पन्नाकाङ्क्षायाः परिपूरकत्वेन यच्छब्दप्रयोग आवश्यक एव। अतः परिभाषेन्दुशेखरस्थपाठ एव युक्ततां भजते। न केवलं परिभाषेन्दुशेखरे पाठोऽयं वर्तते, अपि तु काशिकादिष्वपि स पाठः परिलक्ष्यते। "नेर्विशः"(अष्टा.१/३/१७) इति सूत्रे काशिकायां, न्यासे, पदमञ्जर्यां, वैयाकरणसिद्धान्तकौमुद्याम् इत्यादिषु सर्वत्रैव 'यदागमाः' इत्येव पाठः परिलक्ष्यते। यदागम इत्यत्र षष्ठीसमासो विद्यते, उद्देश्यत्वं हि तत्र षष्ठ्यर्थः। अत आचार्यनागेशेन यदागमाः इति शब्दस्य "यमुद्दिश्य आगमो विहितः" इत्येवं व्याख्यानं कृतम्।

इत्थं परिभाषाभास्करदिशा यदागमपरिभाषायाः विचारः प्रस्तुतः प्रबन्धेऽस्मिन्।

सन्दर्भाः-

1. ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।

सारस्वतं चापिशलं शाकलं पाणिनीयकम्॥

2. झलादौ बहुवचने सुपि परेऽतोऽङ्गस्यैकारः स्यात्। (सि.कौ. पृ.२७)
3. कृत्यल्युटो बलुहम् इति बाहुलकात् कर्तरि ल्युट्।
4. अवर्णान्तात्परस्य सर्वनाम्नो विहितस्यामः सुडागमः स्यात् । (सि.कौ. पृ.२७)
5. डात्परस्य सस्य धुड्वा स्यात्. (सि.कौ.पृ.१७)
6. डः सि धुट्"(अष्टा.८/३/२९) इति सूत्रे प्रौढमनोरमा
7. पदान्तस्य नस्य शे परे तुग्वा स्यात्. (सि.कौ. पृ.१८)
8. तर्कामृतम्
9. तर्कामृतम्
10. वाक्यपदीयम्
11. अनिडादावार्धधातुकेपरे णेर्लोपः स्यात् ।(सि.कौ.पृ.२७५)
12. इडादौ सिचि प्रागुक्तं(हलन्तस्याङ्गस्य वृद्धिः) न स्यात् ।(सि.कौ.पृ.२६५)
13. वदेर्व्रजेर्हलन्तस्य चाङ्गस्याचः स्थाने वृद्धिः स्यात्सिचि परस्मैपदेषु ।(सि.कौ.पृ.२६५)
14. परिभाषेन्दुशेखरः (परिभाषा - ११)

अवलोकितग्रन्थसूची

I. अभ्यङ्करोपाह्व-वासुदेवशास्त्रिसूतमहामहोपाध्यायकाशिनाथः (सम्पादकः, सङ्कलकश्च), (१९६७), परिभाषासंग्रहः, पुणे: भण्डारकरप्राच्यविद्यासंशोधनमन्दिरम्।

II. भट्टः, श्रीनागेशः (२०१६), परिभाषेन्दुशेखरः सुबोधिनीहिन्दीव्याख्योपेतः, व्याख्याता मिश्रः श्रीविश्वनाथः, वाराणसी: चौखम्बा सुरभारती प्रकाशन।

III. भट्टः, श्रीनागेशः,(१९९१), परिभाषेन्दुशेखरः हैमवतीटीकया सम्वलितः, सम्पादकः शुक्लः पण्डितश्रीकालिकाप्रसादः, वाराणसी: सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः।

IV. दीक्षितः, भट्टोजिः, (२००३), प्रौढमनोरमा (अव्ययीभावान्तो भागः) लघुशब्दरत्न-भैरवी-भावप्रकाश-सरला-टीकाभिः संवलिता, , वाराणसी: चौखम्बा संस्कृत संस्थान।

V. पाणिनिः, पुष्पा दीक्षितः, (२०१०) अष्टाध्यायीसूत्रपाठः दीक्षितपुष्पाकृतप्रकरणनिर्देशसमन्वितः, नवदेहली: संस्कृतभारती।

VI. वामनजयादित्यौ, (१९९०) काशिका न्यास-पदमञ्जरी-भावबोधिनी-सहिता (सप्तमो भागः), सम्पादकःत्रिपाठी, डा. जयशङ्करलालः, वाराणसी: तारा बुक एजेन्सी।

VII. दीक्षितः, भट्टोजिः, (२०१२) वैयाकरणसिद्धान्तकौमुदी (प्रथमो भागः), भट्टोजिदीक्षितः, गिरिधरशर्मा, परमेश्वरानन्दशर्मा च (सम्पादकौ), दिल्ली: मोतीलाल बनारसीदास.

VIII. दीक्षितः, भट्टोजिः, (२०१२) वैयाकरणसिद्धान्तकौमुदी (द्वितीयो भागः), भट्टोजिदीक्षितः,

गिरिधरशर्मा, परमेश्वरानन्दशर्मा च (सम्पादकौ), दिल्ली: मोतीलाल बनारसीदास.

IX. दीक्षितः, भट्टोजिः, (२०१२) वैयाकरणसिद्धान्तकौमुदी (तृतीयो भागः), भट्टोजिदीक्षितः, गिरिधरशर्मा, परमेश्वरानन्दशर्मा च (सम्पादकौ), दिल्ली: मोतीलाल बनारसीदास.

❋ ❋ ❋

अलंकारशास्त्रदृष्ट्या रससंख्याविवेचनम् - एका समीक्षा

कांचन बारीक

सारवस्तु :

आचार्यभरतस्य कालादेव स्वीकृतेनाष्टरसवादेन सह शान्तरसं संयुज्य नवमरसवादस्य मान्यताप्रदानं प्रारब्धमासीत्। कालान्तरे दशमत्वेन वात्सल्यस्य चर्चायामपि भक्तिरसस्य अधिकरूपेण स्वीकृतिरस्ति। शृङ्गार-रौद्र-बीभत्सरसान् उत्पादकत्वेन नाम मूलरसरूपेण तथा हास्य-करुण-अद्भुत-भयानकरसान् उत्पाद्यरसत्वेन आचार्यभरतः अभिहितवान्। शारदातनयः भरतोक्तमूलरसवादस्य धारणां प्रत्याखातवान्। अनन्तरम् भानुदत्तः रसतरङ्गिन्यां लौकिकालौकिकरूपेण रस्य भेदद्वयमङ्गीकृतवान्। ततःपरं विविधालंकारिणां मतं पर्यालोच्य इदं वक्तुं शक्यते यत् रसः मुख्यतया द्विविधः, तत्र प्रथमः शृङ्गाररूपः लौकिकः, द्वितीयस्तु भक्तिरूपः अलौकिकः। प्रथममूले लौकिका रीतिः, द्वितीयमूले देवादिविषयकरतिः। साहित्येउच्चकोटिकयोः उभयविधयोः रत्योः विशेषप्रभावः परिलक्षितः।

सूचकशब्दाः

अलौकिकम्, उत्पाद्यम्, उत्पादकं, दशरसवादः, नवमरसवादः, लौकिकम्।

मूलप्रबन्धः

रसोपलब्धग्रन्थमाश्रित्यैव रससिद्धान्तस्य प्रवर्तकः आचार्यभरतमुनिः अभिधीयते। किन्तु भरतमुनिकृतनाट्यशास्त्राद् तथा इतररसविषयकग्रन्थेभ्यः इदं ज्ञातं यत् भरतमुनेः प्राग् एव रसस्य विकाशः विचकाशे। सदाशिव-ब्रह्म-तन्डु-वासुकि-नारद-वृद्धभरत-आदिभरत-सौद्धोदनि-शिलालिन-नन्दि-नन्दिकेश्वर-द्रुहिण-कोहलादयः भरतमुनेः पूर्वाचार्याः आसन्।[१]एते रससिद्धन्तविषये पर्याप्तं चिन्तनं लेखनं चक्रुः। एतैः अनुप्राणितः सन् भरतमुनिः नाट्यशास्त्रे उपरोक्तानामाचार्याणां नामानि प्रोल्लिखितवान्। राजशेखर—शारदातनय-केशवप्रसादमिश्रादीनां ग्रन्थे

अपि पूर्वाचार्याणां नामानि समुपलभ्यन्ते। अनेन इदं स्पष्टं भवति यत् भरतकालाद् प्रागेव रससिद्धान्तस्य मान्यता आसीत्। आचार्यभरतकालाद् प्राग् रससंख्याविषये पूर्वाचार्याः अशमन्। रससंख्यानिर्वचने भरताचार्यः द्रुहीनाचार्यस्य मतमुल्लिखितवान्। भरताचार्यः अष्टौ रसान् अङ्गीकृतवन्तः, यथा – शृङ्गाररसः, हास्यरसः, करुणरसः, रौद्ररसः, वीररसः, भयानकरसः, बीभत्सरसः, अद्भूतरसः चेति। एवंरूपेण पूर्वाचार्याः अपि अष्टौ रसान् अङ्गीचकार। पूर्वाचार्यः शारदातनयः भावप्रकाशनाख्ये ग्रन्थे बहुविधान् रससम्प्रदायान् उल्लिलेख। तेषु द्वे विशिष्टरूपे गुरुपरम्परे वर्तेते। प्रथमपरम्परायां शिव-नन्दिन-वैवस्वत-पदम्भुवाः(द्रुहिनः ब्रह्मा वेति) तथा द्वितीयगुरुपरम्परायां वासुकि-नारद-व्यास-वाल्मिक्यादिमुनयः प्रमुखा आसन्। प्रथमगुरुपरम्परायां अष्टौ रसाः तथा द्वितीयगुरुपरम्परायां नव रसाः स्वीकृताः सन्ति। भरताचार्यः द्वितीयगुरुपरम्परान्तर्गतः इति शारदातनयमतं, नेदं युक्तियुक्तम्। यदि भरतमुनिः द्वितीयपरम्परया युक्तः स्यात् तदा तस्य ग्रन्थे अष्टस्थाने नवानां रसानामङ्कीकारो भवेत्। शारदातनयः स्वयमेव प्रथमगुरुपरम्परायामासीत्, तस्य भावप्रकाशनाख्ये ग्रन्थे अष्टौ रसाः अङ्गीकृताः आसन्। एवंरूपेण भरतकाले तत्प्रागकाले च अष्टौ नाट्यरसाः आसन्। तेन स्वीकृताः अष्टौ रराः, यथा - शृङ्गाररसः, हास्यरसः, करुणरसः, रौद्ररसः, वीररसः, भयानकरसः, बीभत्सरसः, अद्भूतरसः चेति। एते रसाः महात्मना द्रुहिणेन अपि स्वीकृताः। इदं स्पष्टं यत् भरतेन तत्पूर्वाचार्यैः अष्टौ रसाः संभेजिरे। इयम् अष्टरसवादपरम्परा आचार्यदण्डीपर्यन्तं यथायथमासीत्। रसवदलंकारप्रसङ्गे आचार्यदण्डी स्पष्टतया अष्टानां रसानाम् उल्लेखनं कृतवान्। एतस्य पूर्वाचार्ये भामहे काव्यालंकारग्रन्थे प्रेयस-रसवदूर्जस्वीति अलंकाराणां चर्चा विहिता। प्रकारान्तरे "रसैश्च सकलैः पृथक्"[२] इत्यनया उक्त्या रससंख्याविषये अस्पष्टरूपेण अनुल्लिख्य "शृङ्गारादिरसः यथा"[३] इति उक्त्वा रसस्य बहुरूपत्वं संकेतितवान्। दण्डिनः अनन्तरम् आलंकारिकरूपेण सर्वादौ उद्भटः नवरसान् प्रतिष्ठापितवान्। तेन विरचिते काव्यलंकारसारसंग्रहाख्यग्रन्थस्य चतुर्थवर्गे "रसवद् अलंकारः" इत्यस्य चर्चाकाले भरतोक्तैः अष्टभिः रसैः शान्तरसं संयुज्य नवरसान् प्रतिपादितवान्।

"शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।

बीभत्साद्भुतशान्ताश्च नाट्ये नवरसाः स्मृताः॥"[४]

उद्भटः सर्वप्रथमं शान्तरसस्य उल्लेखनं चकार इति तु विशेषविषयः। अतः उद्भटः एव शान्तरसस्य प्रवर्तकः इति अभिहितः। किन्तु काव्यालंकारसारसंग्रहग्रन्थे शान्तरसस्य सस्पष्टतां पुष्टतां च दृष्ट्वा इदमनुमातं शक्यते यत् उद्भटाद् प्रागेव काव्ये शान्तरसः अवर्तत। अनेन इदं स्पष्टी भवति यत् उद्भटसमये नवरसानां प्रचलनमासीत्। एवंप्रकारेण परम्पराप्रवाहेण नवरसानां प्रसिद्धिर्जाता तथैव च रससंख्यावृद्धिसंकोचनयोः निरन्तरप्रयत्नः अवलोकितः। आचार्यवामनः अर्थगुणात्मककान्तिविवेचनप्रसङ्ग रसदीप्तिचर्चा विहितवान्, किन्तु रससंख्याविषये मौनत्वं प्रदर्शितवान्। तस्य श्रृङ्गारादयः इति ग्रन्थं परिशील्य इदं वक्तुं शक्यते यत् रसभेदविषये सः अवगतः आसीत्। उद्भटानन्तरम् आचार्यरुद्रटः रससंख्यां विवर्धितवान्। श्रृङ्गाराभ्यशान्तपर्यन्तं ये नव रसाः वर्तन्ते, तैः सह प्रेयाणः इति आख्यात्मकं नूतनरसं संयुज्य दश रसान् स्वीकृतवान्। एवञ्च स्वकीये ग्रन्थे स्नेहस्थायिभावात्मकं श्रेयान इति नूतनरसमुद्घोषितवान्। अन्यत्र इदमभिव्यक्तं यत् आनन्ददायकत्वादेव एते रसाः। रससंख्याविमर्शवेलायां रुद्रटः महत्युपलब्ध्या प्रेयानरसस्य व्याख्यानपुरस्सरं दशरसवादं प्रतिष्ठापितवान्। किन्तु तस्य उत्तरकालिकाः आचार्यः रुद्रभट्टः श्रृङ्गारतिलके दशरसवादं खण्डितवान्। रुद्रभट्टानुसारं काव्ये श्रृङ्गारादिनवरसानां मान्यता प्रदातव्या।

"श्रृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
बीभत्साद्भुतशान्ताश्च नाट्ये नवरसाः स्मृताः॥"[५]

यद्यपि नवरसवादस्यसमर्थनं कृतवान् तथापि सर्वभावरसवादमङ्गीकृतवान्। रुद्रभट्टः नवानां स्थायीभावानां, त्रयस्त्रिंशत्सञ्चारीभावानां, अष्टानां सात्त्विकभावानां समुल्लेखपूर्वकं प्रोक्तवान् यत् यथा विविधानि द्रव्याणि मधुरादेः रसात्मकतां प्राप्नुवन्ति तथैव सर्वे भावाः सम्यग्रूपेण रसात्मकतां लभन्ते।

एवंरूपेण रुद्रभट्टः संभजति यत् यः कोऽपिभावः परिपुष्टः सन् रसदशामाप्नुयात्। रुद्रभट्टः पूर्वाचार्यस्य रुद्रटस्य दशवादमस्वीक्रियते चेदपि पक्षान्तरे सर्वभावरसवादेन तदङ्गीचकार। ईदृशी स्थितिः अत्यन्तं विषङ्गतिपूर्वा। रुद्रभट्टः नवरसवादस्य समर्थनञ्चकार इति प्रतिभाति किन्तु तस्य मौलिकानुभूत्या

सर्वभावरसवादसमर्थनमेव प्रकाश्यते। ध्वनिकारः आनन्दवर्धनः रससंख्याविषये सुस्पष्टं मतं नोपस्थापितवान्। ध्वन्यालोकस्य क्वचित् स्थानविशेषे नवरसं प्रोल्लिखितिवान्। अनेन अनुमातुं शक्यते यत् सः नवरसत्वमङ्गीचकार। तथापि रुद्रभट्टसदृशः प्रसङ्गानुसारं वर्णस्य रसद्योतकता, औचित्यावश्यकता, रसविरोधाविरोधौ तत्परिहारश्च, रसस्य अङ्गाङ्गिभावः इति विषयानामालोनचनं कृत्वा परोक्षरूपेण रसानन्तवादं समर्थितवान्। आनन्दवर्धनानन्तरकालिक आचार्यः मुकुलभट्टः अभिधावृत्तिमातृकाख्ये ग्रन्थे रससंख्यां विचारितवान्। तेन अभिधालक्षणयोः विवेचनं कृतम्। आचार्यभट्टनायकस्य हृदयदर्पणं तथा भट्टतौतस्य काव्यकौतुमिति ग्रन्थद्वयमधुना न समुपलभ्यते अतः तेषां रससंख्याविमर्शः नावगन्तुं शक्यते। अभिनवभारत्यां तथा ध्वन्यालोकस्य लोचनटीकायां नवरसवादस्य सुस्पष्टता अस्ति।[६] अभिनवगुप्तस्य पूर्वाचार्यः प्रतिहारेन्दुराजः शृङ्गारारभ्यशान्तपर्यन्तं नवरसवादं स्वीकृत्य रुद्रटप्रणीतसर्वभावरसवादं संबभाज।[७]अभिनवगुप्ताचार्यः अभिनवभारतीति ग्रन्थे रसभेदसमस्यां सयुक्तिकंविचारितवान्। पारमार्थिकदृष्ट्या आनन्दमयज्ञानरूपात्मनः आस्वादनत्वेन रसमङ्गीचकार। तन्मते रसस्य बहुरूपकल्पनमनावश्यकम्। अनुभूतेः गहनभावे आनन्दात्मकः एकोऽयं रसः। आस्वादत्वात् आनन्दरूपत्वात् रसः एकविधः। अस्य भेदः न सम्भवति। अभिनवभारतीग्रन्थस्य बहुषु स्थलेषु इदं प्रतिपादितं यत् अभिनवगुप्तः साधारणीकरणसन्दर्भे नवरसवादं स्वीकृतवान्। अभिनवगुप्ताचार्यः शृङ्गारादीनामष्टरसानां निरूपणावसरे मौलिकदृष्ट्या शान्तरसातिरिक्तं नवीनरसं न समर्थितवान्। पारमार्थिकतया रसस्तु एक एव, व्यवहारिकदृष्ट्या नवविधः इति। आचार्यराजशेखरकृते काव्यमीमांसाग्रन्थे प्राचार्यस्य नन्दीकेश्वरस्य समुपवर्णनं लभ्यते। राजशेखरोऽपि नवरसवादमङ्गीचकार इति डः वि. राघवनाचार्यस्य अभिमतम्। आचार्यधनञ्जयः दशरूपके रतिः, उत्साहः, जुगुप्सा, क्रोधः, हासः, विस्मयः, भयः, शोकः इति अष्टभिः स्थायीभावैः सह अष्टौ रसान् स्वीकृतवान्।

"रत्युत्साहः जुगुप्साः क्रोधो हासः स्मयो भयं शोकः।
शममपि केचिद् प्राहुः पुष्टिर्नाट्येषु नैतस्य"॥[८]

उपरोक्तश्लोके शमोल्लेखनात् इदं प्रतीयते यत् धनञ्जयः परोक्षरूपेण शान्तरसं

स्वीकृतवान्। 'केचिद् प्राहुः' इत्यंशं दृष्ट्वा वक्तुं शक्यते यत् धनञ्जयः स्वयमेव शान्तरसस्य स्थायीभावत्वेन शमं नाङ्गीचकार। किन्तु अन्येषामाचार्याणामभिमतं समर्थयन् परोक्षरूपेण शान्तरसम्अनुमोदितवान्। यद्यपि दशरूपकस्य आलोच्य विषयः रूपकम्। अतः शान्तरसपर्यालोचनं तत्र व्यर्थमेव भाति। तेन शान्तरसस्य प्रत्यक्षस्वीकृतिः न प्रदत्ता, कदाचित् काव्ये तदुल्लेखनं तम्। एवंरूपेम नाट्यविषयिणि दशरूपके शान्तरसस्य स्थायीभावस्य शमस्य परोक्षमान्यता वर्तते। धनञ्जयानन्तराचार्यरूपेम कुन्तकस्य नाम प्रसिद्धमस्ति। वक्रोतजीविते रामायणमहाभारतप्रासङ्गिकस्य शान्तरसस्य मान्यतां प्रदत्तवान्। अनेन इदं स्पष्टं यत् नवरसवादे सः प्रत्येता आसीत्। क्षेमेन्द्राचार्यः औचित्यविचारचर्चायां रसौचित्यप्रसङ्गे शृङ्गारादिनवरसानामुल्लेखनं कृतवान्। अनेन तस्य नवरसवादित्वं प्रमाणितं भवति। आचार्यभोजस्य सरस्वतीकण्ठाभरणे तथा शृङ्गारप्रकाशे रससंख्या विस्ताररूपेण वर्णितास्ति। प्रथितान् नवरसान् अतिरिच्य नूतनानां रसानां नामोल्लेखनं चकार। किन्तु भोजेन कियान् संख्यकान् रसान् अङ्गीकृतवान् इति विषयोऽयं विवादमूलकोऽस्ति। सः सरस्वतीकण्ठाभरणस्य पञ्चमपरिच्छेदे नवरसान् अतिरिच्य उद्धत-प्रेयस-उदात्त-स्वातन्त्र्य-आनन्दप्रशम-पारवश्य-साध्वस-विलास-अनुराग-सङ्गम-निर्वेद-रति-अमर्ष-विषाद-जुगुप्सा-उत्कर्ष-हर्ष-धृति-उत्कण्ठा-आवेग-विस्मय-मति-वितर्क-चिन्ता-चपलता-हास-उत्साह-स्तम्भ-गद्गद-उन्माद-क्रीडा-अवहित्था-भय-शङ्कादीनां रसानां प्रोल्लेखनम् अकरोत्। सर्वभावरसवादसम्बन्धितानाम् एकोनपञ्चाशद्रसानां भेदस्वीकरणं तु नासमीचीनं भवेत्। भोजेन न केवलम् एतेषां भावानां रसरूपता उल्लिखिता अपितु बहूनां नूतनानां रसानां चर्चा अपि विहिता। मनसि बहवः भावाः उद्भवन्तीति आधुनिकमनोविज्ञाने अनुमोदितमस्ति। अतः एतेषां सर्वेषां भावानां गणना तु न सम्भवति। एतद्दृष्ट्या भोजसमर्थिता रससंख्या अनन्ता। भट्टलोल्लट-रुद्रट-नमिसाध्वादयः इति पूर्वाचार्याः अपि तन्मतमनुसृतवन्तः। एवंरूपेण भोजमतानुसारं रससंख्या अपरिमिता इति सिद्धम्। अग्निपुराणे मुख्यतया तु शृङ्गाररसस्य एव स्वीकृतिरस्ति। अभिनयादिनिरूपणावसरे शृङ्गार-हास्य-करुण-रौद्र-वीर-बीभत्सरसरूपेण रसोपभेदः परिलक्ष्यते। शृङ्गार-रौद्र-वीर-बीभत्साः इति चत्वारः

उत्पादकरसाः,हास्य-करुण-अद्भूत-भयानकाः इति उत्पाद्यरसाः। एतैः सह शान्तरसस्य संयोजनेन नवरसवादस्य संकेतः उपलभ्यते। किन्तु प्रामाणिकतया शान्तरसमतिरिक्तम् आचार्यमहिमभट्टः नवरसवादमङ्गीचकार, तथैव मम्मटाचार्योऽपि। आचार्यहेमचन्द्रः स्वकीये काव्यानुशासनग्रन्थे नवरसवादं समर्थितवान। आचार्यरामचन्द्रगुणाचन्द्रौ नाट्यदर्पणे करुण-रौद्र-भयानक-बीभत्सरसान् दुःखात्मकेन तथा श्रृङ्गार-हास्य-वीर-अद्भूत-शान्तरसान् सुखात्मकरूपेण अङ्गीकृतवन्तौ। शारदातनयः भावप्रकाशने अष्टरसवादस्य समर्थनं चकार। पृथग्रूपेण शान्तरसस्य चर्चा अपि तेन विहिता। वागभट्टोऽपि वागभट्टालंकारग्रन्थे प्रथितान् नवरसान् वर्णितवान्। शार्ङ्गदेव सङ्गीतरत्नाकरे नवरसवादं समर्थितवान। युगेऽस्मिन् सागरनन्दी-जयदेव-अमरचन्द्र-विद्याधर-देवेश्वर-विद्यानाथादयः आचार्याः रसविमर्शनं तु चक्रुः किन्तु रससंख्याविषये तेषामभिमतं सुस्पष्टतया न प्राप्तम्।

चतुर्दशशतके आचार्यविश्वनाथः परम्परानुमोदितैः श्रृङ्गारादिनवरसैः सह वात्सल्यं संयुज्य दशरसवादं समनुमोदितवान्। भानुदत्तकृतायां रसतरङ्गिन्यां नाट्यसन्दर्भे भरतसम्मताः अष्टौ रसाः समनुज्ञाताः। किन्तु काव्ये नवमरसत्वेन शान्तरसः स्वीकृतोऽस्ति। मायारसविमर्शनहेतुत्वात् भानुदत्तः दशरसवादी इति कीर्तियुतः। प्रत्याखानार्थं तेन वात्सल्य-लौल्य-भक्ति-कार्पण्यरसानां चर्चा विहिता। किन्तु करुणशान्तहास्यरसाणां व्यभिचारित्वेन एते प्रोक्ताः रसाः गृहीताः। मुख्यतया सः अष्टवादी आसीत्।

"श्रृङ्गारहास्यकरुणारौद्रवीरभयानकाः।
बीभत्साद्भूतसंज्ञौ च नाट्ये चाष्टौ रसाः स्मृताः"॥[९]

आधुनिकालंकारिकाणां मध्ये मधुसूदनसरस्वती-रूपगोस्वामी-जीवगोस्वामी-कविकर्णपूरादयः वैष्णवाः भक्तिरसं प्रतिष्ठापयन्तः रससंख्यां विवर्धितवन्तः। रूपगोस्वामी हरिभक्तिरसामृतसिन्धुः इति ग्रन्थे शान्त-प्रीति-प्रेयान-वत्सल-मधुररसान् भक्तिरसे तथा हास्य-अद्भूत-वीर-करुण-रौद्र-भयानक-बीभत्सरसान् गौणभक्तिरसे उपाददात्। कविकर्णपूरः श्रृङ्गारादिशान्तपर्यन्तं नवरसपुरस्सरं मायाचर्चां विधाय रससंख्यामवर्धयत्। केशवमिश्रः तस्य

अलंकारशेखरे नवरसवादे सम्मतिं प्रदर्शितवान्, तथैव पण्डितराजजगन्नाथोऽपि। संस्कृतकाव्यशास्त्रीयपरम्परायाः अन्तिममान्याचार्योः विश्वेश्वरः रसचन्द्रिकायां नवरसवादमङ्गीकृतवान्। एवंरूपेण इदं प्रमाणीयते यत् अधिकाः आचार्याः नवरसवादं समर्थिवन्तः। अव्यवस्थायाः अनवस्थायाः च स्वात्मानं त्रातुं सर्वे परम्परापालने पक्षपातित्वं चक्रुः। ते नाट्यप्रसङ्गे अष्टरसवादं तथा काव्यप्रसङ्गे नवरसवादं समर्थितवन्तः। तथैव ते स्वपरम्परामपि अपिपरुः। एवंरूपेण नवरसवादधारणा सुस्पष्टा चेदपि दशरसवादविषये सुदृढः मतवादः न समुपलभ्यते।[१०] दशरसवादविषये बहुविधानि अभिमतानि प्रचलितानि सन्ति। केचन तु महारसं नाम हरिरसमाश्रित्यैव भक्तिरसे अधिकं प्राधान्यं प्रदत्तवन्तः। किन्तु रससंख्या विषये तेषामभिमतमेव नास्ति। साधनाजनितानन्दे एव तेषामभिरुचिः आसीत्। भक्तिशान्तशृङ्गाररसानां संयोगेन महारसमुत्पाद्य ते दशरसवादमभिहितवन्तः। नाट्यशास्त्रपरम्परायां तु नाट्यसन्दर्भे शृङ्गार-हास्य-करुण-रौद्र-वीर-भयानक-बीभत्स-अद्भूतरसान् आदाय आहत्य अष्टरसानां प्रतिष्ठापनं सञ्जातम्। नवमरसत्वेन शान्तरसस्य ग्रहणं भरतेन विहितमुत न इत्यस्मिन् विषये पण्डितेषु मतभेदः परिलक्ष्यते। केचित् तु भरतनाट्यशास्त्रे अष्टौ रसाः इति कथयन्ति। अतः तन्मते शान्तरसः स्थानं न अवाप्नोत्। भरताचार्यः शान्तरसं संस्थाप्य नवरसस्थले शान्तरस्य वर्णनं कर्तुं शक्नुयात् किन्तु तेन तन्न कृतम्। अतः अनेनैव प्रमाणं भवति यत् सः अष्टरसवादी आसीत्। भरतोत्तरकाले विवादिते नवरसस्थाने शान्तरसः संस्थापितः। विशेषतया उद्भटाचार्यः अग्रगण्यः आसीत्। अभिनवगुप्तस्याभिमतमङ्गीकृत्यैव नवरसत्वेन शान्तरसः स्थानमाप्नोत्। स्वतन्त्ररसरूपेण शान्तरसः अङ्गीकर्तव्यः। यतोहि पुरुषार्थोपयोगितादृष्ट्या शान्तरसः इतरापेक्षया उत्कृष्टः। परमपुरुषार्थेन मोक्षेन सह अस्य सम्बन्धः वर्तते। शान्तरसत्वमपि सन्दिग्धमस्पि। न केवलं काव्ये अन्यरसवत् काव्ये अपि अस्य प्रयोजनत्वं वर्तेत। कालान्तरे दशरसवादमाश्रित्यैव पण्डितवर्गेषु मतभेदः परिलक्षितः। दशमरसस्थाने विविधैः पण्डितैः विविधानि नामानि उद्धृतानि। आचार्यरुद्रटमते प्रेयाणः दशमरसः। तन्मते –

"शृङ्गारवीरकरुणाबीभत्सभयानकाद्भूता हास्यः रौद्रः शान्तः प्रेयानिति मन्त्वायः

रसाः सर्वे॥''[११]

रुद्रटोत्तरकालिकाः भामह-दण्डी-उद्भटादयः आचार्याः आलंकारिकाः प्रेयानरसं प्रेयस्वदालंकारे निहितवन्तः।

प्रेयस्तु भक्तिरसतुल्यः इति दण्डीभामहौ अभिहितवन्तौ। किन्तु उद्भटः रसमेनं काव्ये अन्तर्भावयन् वात्सल्यभावं चर्चितवान्। रुद्रटः भक्तिवात्सल्यरसयोः भिन्नरूपत्वेन सुहृदभावेन सह संयुज्य प्रस्तुतवान्। दशमरसत्वेन वात्सल्यरसस्य स्वीकृतिः सर्वादौ विश्वनाथेन साहित्यदर्पणे चकार –

"स्फुटं चमत्कारितया वात्सलं च रसं विदुः"।[१२]

तेनैव रसोऽयं स्वीकृतः। दण्डीभामहौ प्रेयसालंकारस्य विवेचनं कृत्वा वात्सल्यरसमभिहितवन्तौ। दशमरसवादेषु अन्तर्गतः भक्तिरसः सर्वाधिकरूपेण गृहीतः। भक्तिरसस्य बीजत्वं तु सर्वप्रथमं भामहेन अलंकारोदाहरणे उपन्यस्तम् –

"प्रेयो गृहागतं कृष्णमवादीद्विदुरा यथा।
अद्य या मम गोविन्द जाता त्वयि गृहागत॥
कालेनैषा भवेत् प्रीतिः तवैवा गमनात् पुनः॥"[१३]

दण्डी-उद्भट-रुद्रटादयः आचार्याः भक्तिचर्चां कृतवन्तः। किन्तु तेषामभिमतम् अभिनवगुप्तेन नाङ्गीकृतम्। शान्तरसे एव भक्तेः अन्तर्भावः इति तन्मतम्। धनञ्जयकृते दशरूपके, हेमचन्द्रकृते अलंकारचूडामणौ, शार्ङ्गदेवकृते सङ्गीतरत्नाकरे अभिनवगुप्ताभिमतमेव अनुसृतमस्ति। किन्तु कालान्तरे मम्मटाचार्यः भावध्वनौ एव देवादिविषयकरतिमङ्गीकृतवान्। विश्वनाथाचार्य-जगन्नाथौ च प्रमुखौ आलंकारिकौ इमां भक्तिं नाङ्गीकृतवन्तौ। किन्तु तौ भावत्वेन इमां स्वीकृवन्तौ। एवमुपायेन अलंकारशास्त्रे भावरूपेण भक्तेः प्रतिष्ठा जाता। अन्यत्र बोपदेव-हेमाद्रि-मधुसूदनसरस्वती-रूपगोस्वामी-जीवगोस्वामी-कविकर्णपूरादयः प्रमुखाः आचार्याः शास्त्रीयाधारदानमाध्यमेन एनं भक्तिं दशमरसरूपेण प्रतिष्ठापितवन्तः। मधुसूदनसरस्वत्याः संरचनेन भगवद्भक्तिरसायने भक्तिरसः विशेषरूपेण प्रतिष्ठः जातः। तथापि भक्तिरसोऽयं स्वतन्त्ररूपेण सर्वमान्यः उत न तद्विषये जिज्ञासास्ति। किन्तु एतद्वक्तुं शक्यते यत् हिन्दीकाव्यशास्त्रे भक्तिरसः व्यापकरूपेण समर्थितः। आनन्दप्रकाशदीक्षितादयः कवयः व्यवहारिकरूपेण भक्तिकालीनकाव्येषु एनं

